सर्वमेव कृतं वैरेण द्रुपदेन तव हत्यार्थमुत्पादितेन धृष्टद्युम्नेनेति

13

सर्वं वैरस्मारणेन क्रोधोद्दीपनं तव शिष्येणेति त्वदीयमेव बलं प
रपक्षेपीतितन्निरसनं तव सुकरमिति द्योतितं गुरोः सकाशात्त्व
शिष्योल्पबलः प्रायेण प्रसिद्ध इति अथ च बहुधार्थशस्त्रादिनोप
त्वयैवाध्यापित इति तवैव मौढ्यं ममानर्थकारणं संहननमिति सा
कूतोक्तिः धीमतेति व्यासंगांतरनिराकरणेनानुपेक्षणीयत्वो
क्तिः अथ च पाञ्चोरपि सकाशात्तद्वधोपायभूता विद्या गृहीतेति
साभिप्रायोक्तिः व्यूढामिति प्रभातायां तु शर्वर्यां भीष्मः शांतन
वस्ततः अनेकान्यनुसंयाने व्यादिदेशाथ भारत गारुडं च महा
व्यूढं चक्रे शांतनवस्तदा पुत्राणां ते प्रियाकांक्षी भीष्मः शस्त्रास्त्र
कोविदः व्यूढं दृष्ट्वा ततः सैन्यं सव्यसाची परंतपः धृष्टद्युम्नेन स
हितः प्रत्यव्यूहत संयुगे अर्धचंद्रेण व्यूहेन व्यूढं तमतिदारुणं
इति भारतोक्तार्धचंद्रव्यूहेन व्यवस्थापितामित्यर्थः ३॥

रामचंद्रसरस्वतीकृतटीका ॥

पश्येनामिति यतस्त्वमाचार्यः पांडवानामुपदेष्टा ततस्त्वं शिष्ये
ण द्रुपदपुत्रेण धृष्टद्युम्नेन व्यूढां व्यूहरचनयाधिष्ठितां पांडुपुत्रा
णां सेनां महतीं पश्येति अस्मत्सैन्य एतच्च महत्संदर्शनजनितानंद
भाजनं न त्वत्तोन्योस्ति यं प्रतीयं प्रदर्शनीयेतिभावः ननु स एव
मच्छिष्यः किं न भवदादय इत्यत आह धीमतेति आचार्याणाम
यं स्वभावो यस्मात्तत एव शिष्यप्रणयिनो भवंतीतिभावः व्यूढां तव धृ
ष्टद्युम्नेनेति विहाय द्रुपदपुत्रेणेति वदन् नामस्वनाम्ना प्रसि
द्धिरिति तस्मिन्नरुच्यां व्यनक्ति एवं च येषां धर्मेत्रे आप्याचार्ये
ष्वपीदृशीदृष्टबुद्धिस्तत्र का तुलनापसंभावनेति तात्पर्यं द्रोणेन
सर्वथास्माभिर्विजेययतितव्यं नोदासिन्यमालंबनीयं नापि पांड
वहितं किंचिदाचरणीयमिति प्रच्छहिकाभिसंधिः किंच कर्तव्या
पेतदत्रकपायये ते हीनबलास्मनेचैवमित्याशयवानाह ॥ ३

भाषा अनुवाद ॥

सोई दुर्योधनकी सब बातें सञ्जय नव श्लोकसे कहते हैं कि हे आचार्य देखिये तो यह युधिष्ठिरका सैन्यदल जिसको आपका शिष्य द्रुपदका पुत्र बुद्धिनिधान धृष्टद्युम्नने रचा है सो महात्मा आपके सामने बड़े विस्तारमें युद्ध करनेको तयार निडर खड़ा है ३ ॥

दोहा ॥

सेनापांडुसुतनकीबड़ीद्रोणाचार्यदेष रचीव्यूहसोंशिष्यतव
धृष्टद्युम्नविशेष ३ ॥

15

अत्रशूरामहेष्वासा भीमार्जुनसमायुधि यु-
युधानोविराटश्च द्रुपदश्चमहारथः ४ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

अन्येपिप्रतिपक्षेपराक्रमभाजोवहवः सन्तीत्युपेक्षणीयत्वं
परपक्षस्य विवक्षयन्नाह अत्रेति तस्यांहि प्रतिपक्षभूतायांसे
नायांशूराः स्वयमभीरवः शस्त्रास्त्रकुशला भीमार्जुनाभ्यांस
र्वसम्प्रतिपन्नवीर्याभ्यांतुल्याःयुद्धभूमावुपलभ्यन्ते तेषांयु भ
द्धशौर्यंधीरंविशदीकर्तुंविशिनष्टिमहेष्वासाइति इष्वस्य
न्तेऽस्मिन्नितिव्युत्पत्त्याधनुरुच्यते तच्चमहदन्यैरप्रधृष्यंत
द्विद्यतेयेषांतेराजानस्तथाविवक्ष्यन्ते तानेवपरसेनामध्य
मध्यासीनान् परपक्षानुरागिणोराज्ञोविज्ञापयति युयुधा रो
नइत्यादिना सोभद्रोद्रौपदेयाश्चेत्यन्तेन ॥ ४ ॥

स्वामिकृतटीका ॥

अत्रेति अत्रास्यांचमवांमीशूराः शौर्येणक्षात्रधर्मेणोपेतामहे
ष्वासाइषवोवाणाअस्यन्तेयैस्तेइष्वासा धनूंषिमहान्तइष्वासा
येषांतेमहेष्वासाइ[illegible]युधिसंग्रामे
भीमार्जुनसमाः भीमोभियाभयेनमीयतेचकितैरिववीरांत
रैर्विलोक्यतइतिभीमः अर्जुनःपशुपतिसंग्रामोपार्जितयशो
विभूतिभिरर्जुनंपांडुरंसंपादितविश्वंयेनसोयमर्जुनः तौभी
मार्जुनौअत्यंतप्रसिद्धौयोद्धारौताभ्यांतुल्याःसमाःशूराःसंतिता
नेवनामभिर्निर्दिशतियुयुधानःसात्यकिर्वीरवैरैरवमिश्रीभा
वेनयुद्धाविष्टःयुमिश्रणइतिधातुपाठात् विगतोविपक्षभू
तोराट्राजा [illegible] यस्यशत्रुहदनस्यसविराटः द्रुवत्पदवत्संग्रा
मेनिश्चलौपादौयस्यसद्रुपदोमहारथःप्रत्येकंमहारथत्ववि त
शेषणम् ॥ ४ ॥

रामानुजभाष्यटीका ॥ आदिश्लोकात्रयमर्थम्

तदितं[illegible]भवत ॥

गी॰
टी॰
प्र॰

अभिगुप्तकृतटीका ४ ॥ नास्ति

परमार्थप्रपा टीका

अथतत्रास्थितान्वीरानाह अत्रेति अत्रास्यांचमूं शूराः पराक्र
मवन्तो महेष्वासाः महान्त इषवो बाणा अस्यन्ते क्षिप्यन्ते यैस्ते
ना॰ तथाविधा से[illegible] युधि संग्रामे भीमार्जुनसमास्तत्सदृशबलाः
संति ॥ ४ ॥

वनमाली टीका

इ इषवो बाणा अस्यन्ते यैस्ते महेष्वासा महान्त इष्वासा धनूंषि येषां
ते तथा भीमार्जुनौ प्रसिद्धौ योद्धारौ युद्धे तत्समास्तत्तुल्याः अ
त्रास्यां सेनायां संति तानाह युयुधान इति सार्द्धद्वाभ्यां
युयुधानः सात्यकिः ॥ ४ ॥

जह्मवैजयन्ती टीका ॥

ही एवमाचार्यस्य कोपोद्दीपनाय परसैन्यस्थितिमुक्त्वेदानीं त
स्य भयोत्पादनाय तत्रास्थितान्वीरान्वर्णयंस्तेषामुपेक्षणीय
तां निराकरोति अत्रशूरा इत्यादिभिस्त्रिभिः श्लोकैः अत्रास्यां प
रसेनायां महेष्वासाः इषवो बाणा आसमन्तादस्यन्ते क्षिप्यन्ते ए
भिरितीष्वासा धनूंषि महान्त इष्वासा येषां ते तथा युधि संग्रामे भी
भीमा मार्जुनसमौर्जुनयोस्तुल्याः शूराः तत्तु भयमविगणय्य स्वसमा
नमहत्त्ववीरजिगीषयोत्साहवन्तः सन्ति केवलं धृष्टद्युम्न एव
शूरोस्तीति न मन्तव्यम् तेषां नामानि स्पष्टं युयुधानः सात्यकि
विराटः प्रसिद्धः द्रुपदश्च तवामित्रः एतेषां तु त्रयाणामपि महार
रथ इति विशेषणम् ४ ॥

मधुसूदनी ॥

नकेवलमत्र धृष्टद्युम्न एव शूरो येनोपेक्षणीयता स्यात् किंत्व
स्यां चम्वामन्येपि बहवः शूराः सन्तीत्यवश्यमेव तज्जये यतनीय
मित्यभिप्रायः शूरानेव विशिनष्टि महेष्वासा इति महान्तोरन्यै
रप्रधृष्या इष्वासा धनूंषि येषां ते तथा दूरत एव परसैन्यविद्रावण
कुशला इति भावः महाधनुरादिमत्त्वेपि युद्धकौशलाभावमा
शंक्याह युधि युद्धे भीमार्जुनाभ्यां सर्वसंप्रतिपन्नपराक्रमाभ्यां

नत्वेकेन द्रुपदपुत्रेण
प्रसिद्धेनाधिष्ठितां च
मूमेतामस्मदीयाः
केऽपिरपि जेष्यन्ति किमिति
त्वमुत्ताम्यसीति अत आह
अत्र शूरा इत्यादि त्रिभिः

समास्तुल्याः तानेवाह युयुधानइत्यादिना महारथइत्येतेनयु
युधानःसात्यकिः द्रुपदश्चमहारथइत्येकः अथवायुयुधान
विराटद्रुपदानांविशेषणंमहारथइति ४॥

सदानंदी ॥

एतेनधृष्टद्युम्नेन प्रसिद्धेनाश्रितोयमहं अस्मदीयोपियःकश्चि
ज्जेष्यतीतिनतर्क्यतां १ यतोस्यांपाण्डुसेनायांशूरादृढधनुर्ध
राः युद्धेभीमार्जुनाभ्यांयेतुल्याःसंग्रामदुःसहाः २ सात्यक्या
दित्रयोप्येतेभीष्मप्रोक्तामहारथाः ३॥ ४ ॥

ख

नीलकंठी ॥

तत्रैवबलविशिष्टत्वेनसङ्ग्रामसत्ते इत्याशंक्यवदेतल्पसमुपात्ता
द्वयत्तेविना ४ महेष्वासामहांतइष्वासा धनूंषियेषांते युयु
धानःसात्यकिः द्रुपदश्चमहारथइत्येकः ४ ॥

17

आनंदी टीका

एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशस्त्रप्रवीणस्स
महारथ इति स्मृतः अमितान्योधयेद्यस्तु सोतिरथ इति स्मृतः र
थस्त्वेकेन यो योद्धा तन्न्यूनोर्धरथः स्मृतः इति रथातिरथसंख्या
याम् युयुधानः सात्विकिः ४ ॥

रामकंठी टीका ॥

स्पष्टार्थम् ॥ ४ ॥ ॥

नालकंठी टीका

युद्धे भीमार्जुनाभ्यां तुल्यास्तथा

रथाख्या पञ्च ये येषां ताहृशा व रथः सूरा संति के ते इति नामनिर्देशेनाह युयुधानः

अस्यां सेनायां महान्तः परैर्न श्रीकर्तुमशक्याः सात्यकिः म
हारथ इति प्रत्येकं विशेषणं महारथलक्षणं चोक्तं एकाद
शसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशस्त्रप्रवीणश्च महा
रथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः
रथी त्वेकेन युध्येत् तन्न्यूनोर्धरथो मत इति ४ ॥

रणवीरसमिद्धोधिनी ॥

न केवलं धृष्टद्युम्न एव परपक्षे थिवलो येनास्माकं मध्ये येन के
नापि तस्य निरसनीयत्वेन त्वरानवसरो यावतान्येपि सूरा ए
तस्मादधिकसत्वा अत्र संतीत्याह अत्र सूरा इति अत्रास्यां सेना
यां सूरा न केन चिदपि चालनीयाः स्वयमभीरव इति यावत् अ
थवं योजयेद्राजा सूरान्संग्रामकर्मणीति नीत्या परपक्षेनीतिकु
शलत्व प्रतिपादन साकूता सूरा इति प्रथमं द्वयोर्यनोक्तिः यु
युधानः सात्यकिः महारथ इति त्रयाणां विशेषणं तल्लक्षणं च
एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च
महारथ इति स्मृतस्त इति सौभद्रोभिमन्युः द्रौपदेयाः द्रौपदीपुत्राः

18

पंच सर्वपवमहारथ्याऽइति नैकोपिरथोर्धरथोवा महारथइ
त्यतिरथवस्याप्युपलक्षणं तल्लक्षणंच अमितान्योधयेद्यस्तु
संप्रोक्तोतिरथस्तुसः रथीत्वेकेनयोयुद्धेतन्नूनोर्धरथः स्मृ
तइति ४॥

रामनंदसरस्वतीकृतटीका

अत्रशूराइत्यादिभिस्त्रिभिः अत्रास्यांसेनायांयुधियुद्धविषयेशूरा
उत्साहवंतो येतांस्तेब्रवीमीत्युत्तरेणसंबंधः महेष्वासाइतिहे
ततएवपरसैन्यविद्रावणक्षमाइतिभावः तानेवभीमार्जु
नसमाइत्यादिनामहारथाइत्यंतेनसह मयावर्तंतइतिसमो
वासुदेवः भीमस्यज्येष्ठत्वात्प्राधान्यं अर्जुनकृष्णयोस्तुतादा
तनिकरथिसारथिकृतं पौर्वापर्यमित्यवधेयं शेषंसुगमंप्र
वेशात्मकार्येद्रोणंहप्तीकृत्यद्रोणसंभावितस्वसामर्थ्यंसंपरिह
रन्नाह ॥ ४ ॥

19

भाषा अनुवाद

और इस सेनाके बीच युद्धकरनेमें भीम अर्जुनके समान ध
नुषधारी महाबली और और कितने योद्धाहैं तिनके नाम दु
र्योधन द्रोणाचार्यसे कहतेहैं कि युयुधान जो सात्विकी
और राजा विराट महारथी द्रुपदराजा ४ ॥

दोहा ॥

इहांसूरधनुषीबड़ेअर्जुनभीमान ॥ रणमेद्रुपदविराटऔ
तैसोहियुयुधान ४ ॥

धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान्
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुंगवः ५

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

किञ्च धृष्टकेतुरितिस्पष्टं ५ ॥ ॥ ॥

स्वामिकृतटीका

धृष्टकेतुरिति धृष्टः प्रगल्भः शत्रुवित्रासनः केतुश्चिह्नं ध्वजादि र्यस्य धृष्टा नारणे प्रगल्भा नो केतु र्विनाशकइतिवा धृष्टकेतुश्चेकितानः संग्रामकुशलश्चेकितानो नामैको राजा च काशिराजः काशीब्रह्मतत्वप्रकाशीय स्थानिवसतः सुलभः साकाशीतस्याराजा सः वैरिषु विजयी शैब्यः संग्रामविजयार्हः नरपुंगवो नरश्रेष्ठः ॥ ५ ॥

रामानुजभाष्य[illegible] ॥ आदिश्लोकात्त्राप्यमर्थम्

तस्यविषय[illegible]कभीष्म[illegible]सर्वैजनयितं ॥

अभिनवगुप्तकृतटीका ५ ॥ नास्ति

परमार्थप्रपा टीका ॥

अथ तानेवाह युयुधान इति युयुधानः सात्यकिः विराटस्तथा द्रुपदो द्रौपदीपिता चेकितानो नामराजा कश्चित् [illegible] नरपुंगवो नरश्रेष्ठः विक्रांतः पराक्रमी युधामन्युनामकः [illegible] उत्तमौजा वीर्यवान् एतावर्जुनस्य रथचक्ररक्षकौ उक्तं च भीष्मपर्वणि दृष्टेरा पार्जुनस्यापि युयुधानो महारथः चक्ररक्षौ च पांचाल्यौ युधामन्यूत्तमौजसौ सौभद्रोभिमन्युः [illegible] द्रौपदेयाः द्रौपद्याः पंचभिर्जाताः पंच पुत्राः प्रतिविंध्यादयः एवमुक्ताः सर्वे महारथाः उक्तं च एकादशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशस्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु सम्प्रोक्तोतिरथाभिधः एकस्त्वेकेन यो योद्धा समश्चार्धरथ उच्यते इति ५ ॥

वनमाली टीका ॥ ५

उत्तमवैजयन्ती टीका

किञ्च धृष्टकेतुश्चे[illegible]कितानः काशिराजश्च वीर्यवानिति विशेषणं

इति[illegible]

गी॰
टी॰
प्र॰

20

पुरुजित्कुंतिभोजश्चशैव्यश्चेतित्रयाणांनरपुंगवइतिविशेषणम् ५ ॥

मधुसूदनी

धृष्टकेतुचेकितानकाशिराजानांविशेषणंवीर्यवानिति पुरुजित्कुंतिभोजशैव्यानांविशेषणंनरपुंगवइति ५ ॥

सदानंदी

वीर्यवंतस्त्रयश्चाप्येतेधृष्टकेतुमुखान्नृपाः पुरुजित्प्रमुखा स्त्वन्येत्रयोपिनरपुंगवाः १।५ ॥

नीलकंठी

[illegible] कर्णोपाख्यानकाइ [illegible] धृष्टकेत्वादयःषट् ५

आनंदी टीका

स्पष्टार्थम् ५ ॥ ॥

रामकंठी टी.

स्पष्टार्थम् ५ ॥ ॥

लासिकरी टी. ॥

तथा धृष्टकेतुरित्यादिनामत्रयस्यविशेषणम्वीर्यवानिति श्रेष्ठः नरपुंगवइति पुरुजिदित्यादिनामत्रयस्यविशेषणम्
५ ॥ ॥

रणवीरसमिद्धोधिनी ॥

स्पष्टः ५॥

21

रामचंद्रसरस्वतीकृतटीका उपक्रमणिका ॥

भाषाअनुवाद

और धृष्टकेतु चेकितान राजा और बलवान काशीराज और पुरुजित राजा कुन्तिभोज और शैव्य येसब राजा नरश्रेष्ठ और बलवान् हैं ५ ॥ दोहा॥

धृष्टकेतुचेकितानपुनकाशीराजबलवान पुरुजितकुंतिभोजशैव्यश्रेष्ठनरजान ५॥

युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥ ६ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

तेषां सर्वेषामपि महाबलपराक्रमभाक्त्वादनुपेक्षत्वं सूचयति सर्व एवेति ॥ ६ ॥

स्वामिकृतटीका

युधामन्युश्चापरो विक्रान्तो वीर्यवान् उत्तमौजाः सौभद्रोऽभिमन्युः द्रौपदेया द्रौपद्यास्तनयाः अथवा विक्रान्तो युधामन्युर्नामैकः सः द्रौपदेयाः द्रौपद्यां पंचभ्यो युधिष्ठिरादिभ्यो जाताः प्रतिविंध्यादयः पंच एते सर्वे महारथा एव महायुद्धोत्सवाय आसमंतात् रथः शस्त्रास्त्रादिसंभृतो येषां ते महारथादीनां लक्षणं एको दशसहस्राणि योधयेद्यस्तु धन्विनां अस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथी त्वेकेन योयुध्येत्तन्न्यूनोऽर्धरथो मत इति ॥ ६ ॥

रामानुजभाष्यं मू आदिश्लोकत्रयमर्थम्

सिंहनादं शंखनादं कृत्वा ॥ ६ ॥ । । ।

अभिनवगुप्तकृतटीका ॥ ६ ॥ नास्ति

परमार्थप्रपा ॥

पूर्वश्लोकान्तरे टीका ॥ ६

वनमाली ॥

सर्वे महारथा एवैकोऽरथोऽर्द्धरथो वा महारथा इत्यतिरथत्वस्याप्युपलक्षणं तल्लक्षणं च एको दशसहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स हि महारथः स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्द्धरथः स्मृत इति ॥ ६ ॥

उत्तमवैजयन्तीटीका ॥

॰२॰ यद्वा तेषां गणनेन पाण्डुपुत्राणां चमूं पश्येति पूर्वेणाविरोधः यतः पाण्डुपुत्राणामित्यनेनान्यत्र भेदे षष्ठी स्याद्राजपुरुषवत् यद्वा आर्तानां पृथग्ग्रहणमो न्नाय(?)णेनास्माकं हृदयं कंटकीभूतोऽनवधि दीर्घतेऽतस्तेन गणिता इति दुर्योधनस्याशयः एषां सहायेन तेऽभवन् प्रबलत्वाद्ये ते दृष्टाः द्वौ इति प्रयत्नः कृतवान् इति भयं सूचितम् ॰२॰

93

॰२॰ महारथ शब्दोऽतिरथस्याप्युपलक्षणं ननु सर्वेषां मध्ये मुख्यान्पाण्डवान्कथं न गणयसीति चेच्छृणु [illegible]

विशेषेणातिशयेन क्रमं पादविक्षेपणं करोतीति विक्रान्तः युधामन्युः उत्तमौजाश्च स वीर्यवांश्चेति विशेषणं सौभद्रोऽभिमन्युः द्रौपदेया द्रौपदीसुताः पंच प्रतिविन्ध्यादयः चकाराद् अन्येऽपि घटोत्कचादयः एते सर्वे महारथा एव पाण्डवास्त्वतिरथत्वेनातिप्रसिद्धत्वान्महारथानां मध्ये न गणिताः महारथादीनां लक्षणं च एको दश सहस्राणि योधयेद्यस्तु धन्विनाम् शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु सम्प्राप्तोऽतिरथस्तु सः रथस्त्वेकेन योद्धा स्यात्तन्न्यूनोऽर्धरथस्तु सः ६ ॥

मधुसूदनी

विक्रान्तो युधामन्युर्वीर्यवांश्चोत्तमौजा इति द्वौ अथवा सर्वाणि विशेषणानि सर्वत्र योजनीयानि सौभद्रोऽभिमन्युः द्रौपदेयाश्च द्रौपदीपुत्राः प्रतिविन्ध्यादयः पंच चकाराद् अन्येऽपि पाण्ड्यराजघटोत्कचप्रभृतयः पंच पाण्डवास्त्वतिप्रसिद्धा एवेति न गणिताः ये गणिताः सप्तदश अन्येऽपि न द्रीयाः सर्व एव महारथाः नैकोऽपि रथोऽर्धरथो वा महारथ इत्यतिरथस्याप्युपलक्षणं तल्लक्षणं च एको दश सहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु सम्प्रोक्तोऽतिरथस्तु सः रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृत इति

॰२॰ सर्वेऽपि महारथा एव

मदानंदी ॥

विक्रान्तो युधामन्युः उत्तमौजाश्च वीर्यवान् अभिमन्युस्तथा पंच प्रतिविन्ध्यादयस्तथा १ एते सप्तदश घटोत्कचश्च अबलिष्ठोऽपि पाण्डवास्ते महारथाः तथा सर्वे महारथा एव नैकोऽप्यर्धरथो रथः २ अत्यन्तसूक्ष्म एको दश सहस्राणि यो योधयेद्धन्विनः शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः अमितान्योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः ४ रथस्त्वेकेन यो योद्धा तन्न्यूनोऽर्धरथः स्मृतः ५ ॥ ६

युधामन्यूत्तमौजसौ सौभद्रोभिमन्युः पंचद्रौपदेयाः प्रतिविंध्या
दयस्त्वेते चकारात्पांड्यवाघटोत्कचादयस्तातिप्रसिद्धा ये
स्ताः सर्वेपि महारथा एव तल्लक्षणं तु एकोदशसहस्राणि यो
धयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स वै प्रोक्तो महारथः
अमितान्योधयेद्यस्तु संप्रोक्तोतिरथस्तु सः रथस्त्वेकेन योद्धा
स्तान्न्यूनोर्धरथः स्मृत इति ९ ॥

24

आनंदी टीका

सौभद्रोभिमन्युःद्रौपदीयाःद्रुपदीपुत्राःप्रतिविन्ध्यादयःपंच १

रामकंठी टी०

स्पष्टार्थम् १ ॥ ॥

लासिकी [illegible] टीका

तथायुधामन्युःसूरःउत्तमौजाबलयुक्तःअभिमन्युःद्रौपदीपुत्राःप्र
तिविन्ध्यादयःपंचअन्येपि एतेसर्वेमहारथाएव १ ॥

रणवीरसमिद्योतिनी॥

स्पष्टः १

25

रामचंद्रसरस्वतीकृतटीका ॥ उपक्रमणिका १ ॥

भाषा अनुवाद ॥

[illegible]पराक्रमी युधामन्यु नाम राजा और बलवान उत्तमौजा नामएकराजा और सुभद्राके पुत्र अभिमन्यु औ द्रौपदीके गर्भ २
से युधिष्ठिरादि पांचजनेसे उत्पन्न प्रतिविन्ध्यादि पांचभाई एस
ब महारथी वीरहैं महारथीका लक्षण जो अस्त्रशस्त्रमें निपुण हो दश हजार धनुर्धारी योद्धाके साथ अकेला युद्धकरसके उसीकोमहारथीकहतेहैं और असंख्ययोद्धोंकेसाथ युद्धकरने मेंजो समर्थ उसे अतिरथी शास्त्रमे कहतेहैं और एक योद्धाके साथ जो युद्धकरे सो रथीहै उससेभीकम अर्द्धरथी कहावैहै ६

दोहा॥

युधामन्युविक्रांतअरुउत्तमौजबलवंत द्रौपदेयसौभद्रसमम
हारथीविलसंत ८॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ना
यका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ७ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

यद्येवं परकीयं बलमतिप्रभूतं प्रतीत्यातिभीतवदभिदधासि
हन्त सन्धिरेव परैरिष्यतामलं विग्रहाग्रहेणेत्याचार्याभिप्राय
माशंक्याब्रवीति अस्माकमिति तुशब्देनात्र तत्परमपि स्वकी
ये भये तिरोदधानो धृष्टतामात्मनो द्योतयति ये त्वत्समत्वे
नावस्थिताः सर्वेभ्यः समुत्कर्षजुषस्तान्मयोच्यमानान्निबोध
निश्चयेन मद्वचनादवधारयेत्यर्थः यद्यपि त्वमेवं त्रैवर्णिकेषु
त्रैविद्यवृद्धेषु प्रधानत्वात् प्रतिपत्तुं प्रभवसि तथापि मदीय
सैन्यस्य ये मुख्यास्तानहं ते तुभ्यं संज्ञार्थमसंख्येषु तेषु मध्ये क
तिचिन्नामभिर्गृहीत्वा परिशिष्टानुपलक्षयितुं विज्ञापनं करो
मि न त्वज्ञातं किंचन त्वज्ञापयामीति मत्वाह द्विजोत्तमेति ७ ॥

स्वामिकृतटीका ॥

अस्माकमिति हे द्विजोत्तम तु पुनः येऽस्माकं धार्तराष्ट्राणां वि
शिष्टाः पाण्डवसेनावीरेभ्योपि श्रेष्ठास्तान्निबोधावधारय मम
सैन्यस्य ये नायकास्तानहं ते तुभ्यं संज्ञार्थं सम्यक्ज्ञानार्थं
ब्रवीमि कथयामीत्यर्थः ७ ॥

रामानुजभाष्यटीका ॥ आदिश्लोके गतार्थम्

[illegible] ॥ ७

अभिनवगुप्त टीका ७ नास्ति

परमार्थप्रपा टी. ॥

अथ स्वकीयां सेनामाह अस्माकमिति अस्माकं सैन्ये ये विशि
ष्टाः विवक्षितास्सन्ति तान्निबोध बुध्यस्व मम सैन्यस्य नायका
नि येन तान् ७ ॥

वनमाली टी.

ननु परसैन्यं दृष्ट्वा भीतस्त्वं संधिं करिष्यसीत्याचार्याशयं बुद्ध्वाह अ
स्माकमिति मम सैन्यस्य नायकान्नेतान् हे द्विजोत्तम तव संज्ञा

गी॰
टी॰
प्र॰

७९

ॱ मुनेके मुके षांचिन्नामकथनेन मुखाल्लदयितुं नेतुभ्यं ब्रवीमि कथयामि द्विजोत्तमेति संबोधनेनाचार्यमा
शयुः ब्राह्मणत्वान्नायमाभाविकमार्दवान्मुखन समुद्भवकात रूपादि विदशत्वेन मघवा त्वद्वधायोद्य
तान्त्रियशिष्यानर्जुनादीन्निदिद्योत्पन्नहर्षोतिशय विस्मरण ब्राह्मणानक्षत्रणबापेरल यद्वायव्वी
रस्थानिजनसभयोदयेन यदि ते युद्धादुपरति ; स्यात्तर्हि उद्भवः कोणशल्य प्रकृत्यादयः दक्षिया :
सन्ति तेयुद्धं करिष्यन्ति नवोपसमेन नकापि दिनिर्स्तीति ॥ ८ ॥
र्थं मम यकज्ञानार्थं ब्रवीमि त्वं निबोधजानीहि ७ ॥

श्रसमैवेजयन्ती टी॰ ॥

ननु परबलं मा द्रक्ष्यसि तथापि सैन्यै कोप्यस्ति वीरो न वास्ति चे
मुद्दंजहनो चेद्धि ग्रहाग्रहं न्यकोतेस्संधिं कविन्याशंकां ममा
णाश्वेष्ठ अस्माकमिति हे द्विजोत्तम वर्ण त्र्या
सैन्यस्य नायकाः सेनापतयो ये सन्ति तान्निबोध त्वं जानीहि
संज्ञार्थं नामबोधार्थं ॥ ७ ॥

ॱ यद्येवं परबलमति
प्रभूतं दृष्ट्वा भीतोसि
हंत तर्हि संधिरेव परै
रिष्यतां किं विग्रहाग्र
हेणेत्याचार्याभिप्राय
माशंक्याह ॥ ८ ॥

मधुसूदनी टी॰

ॱ तुशब्देन तारतम्यमपि भयं तिरोदधानो धृष्टतामात्मनो द्योत
यति अस्माकं सर्वेषां मध्ये ये विशिष्टाः सर्वेभ्यः समुत्कर्षजु
स्तान्मयोच्यमानान्निबोध निश्चयेन मद्वचनादवधारयेति भो
वादिकस्य परस्मैपदिनो बुधेरूपं ये च मम सैन्यस्य नायकाः
गृहीत्वापि विशिष्टानुपलक्षयितुं तेतुभ्यं ब्रवीमि न त्वज्ञातं
किंचिदपि तव ज्ञापयामीति द्विजोत्तमेति विशेषणेनाचार्यस्तु
तिब्राह्मणत्वान्नावयुद्धाकुशलस्त्वं तेन त्वयि विश्वेऽपि भी
स्मप्रभृतीनां क्षत्रियप्रवराणां सत्वान्नास्माकं महती क्षतिरि
त्यर्थः संज्ञार्थमिति प्रियशिष्याणां पाण्डवानां चमूं दृष्ट्वा हृष्ट
णवाकुलमनसो लवणीयवीरविस्मृतिर्मा भूत् ॥ ७ ॥ ॱइति मनसि क्रिति

मदानंदी टी॰

दृष्ट्वेति मनो भीतस्त्वं तर्हि संधिर्विधीयतां इत्याशंकां सञ्जाल
त्यगुरोरग्रहं वचो नृपः १ तुशब्देनातत्पत्रो भीतिमाक्षक्षा
दयन्नृपः द्योतयत्यात्मनो धार्ष्ट्यं गुरोरग्रे महत्तरं २ मध्येस्मा
कं मम ख्यातानायविशिष्टगुणान्विताः तान्मयोच्यमानान्
त्वं महाकाय दवधारय ३ मम सैन्यस्य नेतारो ये च तान्स्तेव-
वीम्यहं गृहीत्वा नामभिः कांश्चित्क्लिष्टांस्तानपि त्वत्स्फुटं ४

द्विजोत्तमेतिशब्देनब्राह्मणनामदत्तंतो संग्रामेक्षत्रियस्यैव
दुष्टभावेनभूपतिः ५ संज्ञार्थमितिशब्देनप्रियशिष्यवन्म
२ तव दृष्ट्वाहर्षवशांमास्त्वसीयवीरप्रविस्मृतिः १ ॥ ७ ॥

नीलकंठी टी. ॥

विशिष्टाः श्रेष्ठाः निबोधबुध्यस्व भौवादिकस्यपरस्मैपदिनो
बुधेरिदंरूपं संज्ञार्थंप्रसमन्येऽपिशूराःसंतीतिज्ञापनार्थं ।
परेषांबलंदृष्ट्वातवोत्साहभंगोमाभूदित्यर्थः ७ ॥

29

आनंदी टीका

एवं प्राधान्येन पांडवानां नायकान्निर्दिश्य स्वानाह असंख्येषु ते
षु मध्ये संज्ञार्थं कांश्चिद्ब्रवीमि ७ ॥

रामकंठी टीका

स्पष्टार्थम् ७ ॥

अस्माकं

लाखिणी टीका

अस्माकं त्विति याः तेषां राज्ञां मध्ये श्रेष्ठाः सन्ति द्विजोत्तम मद्व तान्निबोध
चनादवधारय । नेतारः अध्याः संप्रज्ञानार्थं ब्रवीमि ७ ॥

ये च मम सैन्यस्य नायका तान्प्रत्यय

रणवीररससिद्धोधिनी ॥

ननु यदि परेषां बलमतिप्रभूतं बलं भासते तर्हि तवातिभीतस्य परैः
संधिरेवोचितो न पुनर्विग्रहस्तत्र इत्याशयेनाभिप्रायमाशंक्याह
अस्माकं त्विति तु शब्दः समुत्पन्नभयतिरोधानेनोत्साहव्यंजकः अ
स्मत्पक्षे ये विशिष्टाः सर्वोत्कर्षभाजस्तान्मया कथ्यमानान्निबोध
निश्चयेन मद्वचनादवधारयेत्यर्थः ये च मम सैन्यस्य मुख्या
नायका नेतारस्तानहं तुभ्यं संज्ञार्थं संज्ञा स्याच्चेतना नाम हस्ता
द्यैश्चार्थसूचनेति नानार्थकोशादन्येषामनुक्तानां सूचनार्थम
संख्येषु तेषु मध्ये कतिचिन्नामभिर्गृहीत्वा परिशिष्टानुपलक्ष
यितुं विज्ञापनं करोमीति द्विजोत्तमेति संबोधनं ब्राह्मणानां को
मलप्रायतया हिंसाप्रायत्वात्कर्कशहृदयसंपाद्यं युद्धं भवतां
दुष्करमेवेति भीष्मादिप्रवीरसत्वेन तद्यानतवोपयोग इति द्रोणा
भिप्राय व्यंजकं ७ ॥

30

अस्माकमितिचतुर्भिः येषांपांडवानांविशिष्टाः भीमार्जुनवा
सुदेवाःकथिताःसेनापतयस्तुयुयुधानाख्यसात्यकिप्रमुखा
उक्ताएवमस्माकमपिधार्तराष्ट्राणांसर्वेषांयेविशिष्टास्तांस्त
ब्रवीमि येचममराज्ञः सेनानायकास्तांस्तेब्रवीमीतिपदमा
वर्तनीयंयोज्यं द्रोणमभिमुखीकरोति निबोधद्विजोत्तमेति
नितरांबोधयेनीति शास्त्रकौशलंयेषांतेनिबोधास्तेचतेद्विजा
स्तेषूत्तमनीतिज्ञोसिकिंबहुभाषितेनेतिभावः निबोधेतिवा
तिङंतंपरस्मैपदिनोत्रेयंसंप्रदायात् नर्जुनिमि र्थ मस्मत्तोन्य
स्थानेचमांप्रतिब्रूहि इत्याशंक्याह संज्ञार्थमिति विशिष्टोहीदृशोहेल
मतस्तेस्मीयविस्मृतिर्नाहृरदितिममेयमुक्तिरितिभावः ॥८

भाषा अनुवाद

जो प्रबल शत्रु सेनादल देखि डरैसे बोलतेहो तो मेल क्यो नकरलो लडाईसे क्या फलहै ऐसा द्रोणाचार्यने कहे इस शंकासे दुर्योधन कहताहै कि मेरे पक्षमे जो नायक कहे सेनापतिहैं वे सब आपसे छिपे नहीं तौभी उनके नाम आपको स्मरन करानेके लिये कहताहूं ॥ ७ ॥

दोहा ॥

सुरश्रेष्ठहमरेअवैतिनद्धिजानहुद्विजनाथ नायकहमरीसे
नकेकहतनामतोहिसाथ ७॥

3

भवान्भीष्मश्चकर्णश्च कृपश्चसमितिंजयः अ
श्वत्थामाविकर्णश्च सौमदत्तिस्तथैवच ८ ।

भाष्यंनास्ति आनन्दगिरिकृतटीका

तानेवस्वसेनानिविष्टान् पुरुषधौरेयानात्मीयभयपरिहारा
र्थं परिगणयति भवानित्यादिना ८ ॥

स्वामिकृतटीका ॥

तानेवाहभवानितिद्वाभ्यां भवान्त्वमेवतावत्यस्सनवयुद्धको
शलोपदेशेनभगवान्पशुपतिरपार्जुनेननिर्जितःसत्वंद्रोणः
भीष्मःसकलक्षत्रक्षयकारिचक्रयुद्धलीलावतारपरशुराम
स्यापिरणभयंकरत्वात्भीष्मःकर्णःवैरिणांकर्तनात्कर्णःकृ
पाठः पःशत्रुहिंसनशीलःहिंसार्थःसमितिंसंग्रामंजयतीतिसमि
तिंजयःअश्नुतेव्याप्नोतिअश्नातिवैरिणांभक्षयतिवाअश्ववा
इवाभियातिचगच्छति येनस्थाम्नाबलेनतत् अश्वत्थामश्चस व=
त्ययातोश्वशब्दःनतुताहंशःसकललोकोपसंहारदक्षस्यदाना द
यणीपतेर्लीलावतारइत्यश्वत्थामायस्मात् यस्याऽसमानवीर
संग्रामोपार्जितकीर्तिमंजरीवर्णनायामस्पर्धिनःपार्थिवाविग
तकर्णाबधिराइवोद्विजन्तोभवंति इतिविकर्णःपार्वतीपतिद
त्तवरःसोमदत्तस्यपुत्रःसौमदत्तिःभूरिश्रवास्तथैवचय था
भवान्भीष्मस्त्रैलोक्यपराजयक्षमोतथैवतेरपीत्यर्थः ८ ॥

रामानुजभाष्य[illegible]म् आदिश्लोकगतार्थम्

ततस्तेद्योधमाकर्ण्यसर्वंधृतेश्वरः ॥ ८

अभिनवगुप्तटीका ॥८ ॥नास्ति

परमार्थप्रपा टी॰ ॥

तानाह भवानिति भवान्द्रोणः भीष्मः कर्णः कृपः कृपाचा
र्यःसमितिंसंग्रामंजयतीति तथासौमदत्तिः सोमदत्तस्यपुत्रो
भूरिश्रवाः ८ ॥ वनमाली टी॰
तानाहद्वाभ्यांसमितिंजयइतिकृपविशेषणमव्यवहितत्वात्

गी. टी. प्र.

33

समितौयुद्धेजयशीलःसोमदत्तिंपुत्रोभूरिश्रवाः ८ ॥

उत्तमवैजयन्ती टी.

कतिचित्त्वंमभिज्ञानेवविशिष्टानाहंभवानितिद्वाभ्यां भवा
न्द्रोणस्तथाभीष्मस्तथाकर्णस्तथाकृपः समितिंजयेति
चतुर्णांद्रोणादीनांविशेषणम् समितिंसंग्रामंजयतीति
सतथाअश्वत्थामाद्रोणपुत्रःविकर्णोमद्भ्राताउमयासह
शिवःसोमस्तेनदत्तःसोमदत्तस्तस्यपुत्रःसोमदत्तिःभूरि
श्रवाः ८ ॥

मधुसूदनी टी.

तत्रविशिष्टान्गणयति

भगवान्द्रोणःभीष्मःकर्णःकृपश्चसमितिंजयइतिकृपवि
शेषणंकर्णादनंतरंगण्यमानत्वेनतस्यकोपमाशंक्यतन्नि
रासार्थंएतेचत्वारः सर्वतोविशिष्टाः नायकानुगणयतिअ
श्वत्थामाद्रोणपुत्रः भीष्मापीत्वयाचार्यस्य प्रथमगणनव
द्विकर्णापेक्षयातत्पुत्रस्य प्रथमगणनमाचार्यपरितो
षार्थंविकर्णःस्वभ्राताकनीयान् सोमदत्तिःसोमदत्तस्यपुत्रः
श्रेष्ठत्वाद्भूरिश्रवाःजयद्रथःसिंधुराजःतथैवचेतिक्वचित्पा
ठः ८ ॥

सदानंदी टीका ॥

केतेस्युरित्यपेक्षायांप्राहचत्वारश्चादरात् भवत्प्रभृतयः
शूराःसर्वेसंग्रामकोविदाः अश्वत्थामादयोयेचतेपिशूरा
महत्तमाः १॥ ८ ॥

नीलकंठी ॥

विकर्णःस्वभ्राता सोमदत्तिर्भूरिश्रवाः जयद्रथपदस्यानेत
थैवचेतिक्वचित्पाठः ॥ ८ ॥

आनंदी टीका

एतेसर्वेमहारथाएव ॥ ८ ॥

रामकंठी टी॰

स्पष्टार्थम् ॥ ८ ॥

लासिकी [illegible]वती टीका तत्राभीष्मपितामहः कृपः कृपाचार्यश्च सवर्तिविधः समितिंजयः

तथाश्वत्थामा

...आदौतावद्भवांस्त्वमेवश्रेष्ठः आचार्यः युद्धेजयनशीलः वि॰
ति कर्णोभूरिश्रवाः अन्येपिसन्तिइत्यर्थः ॥ ८ ॥ अन्नजयद्रथइतिपाठान्तरम्

रणवीरसमिद्धोधिनी ॥

तामेवपरिगणयति भवानितिद्वाभ्यां दस्यतवगुरुद्रोणाचार्योपदे
शेनाणिमाद्यष्टसिद्धिप्रयुक्तोपिशिवोर्जुनेनजितः सभवान्द्रोण
अन्यस्य प्रथमंपरिगणनंपरितोषार्थं स्वगुरोःपरशुरामस्यापि
रणेतिघातयितयाभयंकरवाङ्भीष्मोदेवव्रतः पाण्डूनांकर्णनाम्
र्णः कृणोतीतिकृञ्हिंसायामितिधातोरूपं कृपइतिकृपोरि
पुहंता इतिविशिष्टपरिगणनं अश्वातिभक्षयतिपाण्डूनांरुधिर
मितिअश्वत्थामा स्थामबलमस्येत्यश्वत्थामाद्रोणपुत्रः
यंविलोकयितुंपरावर्तितोभवतिसविकर्णः सोमः पार्वतीपति
स्तेनदत्तवरः सोमदत्तस्तस्यापत्यंसौमदत्तिर्भूरिश्रवाः इति
नेरपरिगणनं ॥ ८ ॥

84

रामचंद्रसरस्वतीकृतटीका

ननुकिमर्थमस्मत्सैन्यस्थानेवमांप्रतिकथयस्याशंक्याह
संज्ञार्थमिति शिष्योदीनत्वेनैवमनसस्लेखीयविस्तृतिना
हंदितिममेमियंयुक्तिरितिभावः भवान्भीष्मश्च कर्णश्च
तिविशिष्टकथनं ॥ ८ द्रोणं सैन्यनायककथनं स्वसैन्यबाहुल्यं
तस्य ह्यस्मन्नक्तिरुद्योगः सर्वशास्त्रप्रवीणता युद्धकौशलं चास्येवेत्य
नेन दर्शितम् ८

35

भाषा अनुवाद ॥

सोई ये दो श्लोकसे कहतेहै संग्राम विजयी आप और भीष्मपितामह कर्ण कृपाचार्य अश्वत्थामा विकर्ण और सोमदत्तका पुत्र भूरिश्रवा और जयद्रथ ये सब वीर अपनी ओरहै ८ ॥

दोहा ॥

द्रोणतुमैंभीष्मकर्णकृपदिग्विजयीजोय अश्वत्थामविकर्णभूरिसौमदतितथासोय ८ ॥

36

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः ना-
नाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका

द्रोणादिपरिगणनस्य परिशिष्टपरिसंख्यार्थत्वं व्यावर्तयति
अन्ये चेति सर्वेऽपि भवन्तमारभ्य मदीयपृतनायां प्रविष्टाः स्व-
जीवितादपि मह्यं स्पृहयन्तीत्याह मदर्थ इति यत्तु तेषां शूर-
त्वमुक्तं तदिदानीं विशदयति नानेति नानाविधान्यनेकप्र-
काराणि शस्त्राण्यायुधानि प्रहरणानि प्रहरणसाधनानि
यां येषां ते तथा बहुविधा युद्धसम्पन्नावपि तत्प्रयोगनैपुणाभा-
वे नेष्टफलत्वमिति चेन्नेत्याह सर्व इति ॥ ९ ॥

स्वामिकृतटीका ॥

अन्ये चेति अन्येऽपि सहायत्वेन समाहृता भगदत्तशल्यप्रभृ-
तयः बहवः शूरा मदर्थे मत्प्रयोजनार्थं मम विजयसाधनार्थं
वा त्यक्तजीविताः जीवितं त्यक्तुमध्यवसिता इत्यर्थः नानाविधा-
न्यनेकानि शस्त्राणि प्रहरणसाधनानि येषां ते युद्धे विशारदा
निपुणा इत्यर्थः ९ ॥

रामानुजभाष्यं ॥ आदिश्लोकगतार्थम्

पार्थसारथी च पाण्डुतनयैश्च लोकविजयोपकरणभूते । ९

अभिनवगुप्तकृतटी० ९ ॥ नास्ति

परमार्थप्रपाटी० ॥

अन्ये चेति अन्ये एतदतिरिक्ता बहवः शूराः सन्तीति मदर्थे मत्प्र-
योजनाय त्यक्ताजीविताः संकल्पितप्राणाः नानाशस्त्रैः प्रह-
रन्ति युध्यन्ति ते तथा अत एव विशारदाः ॥ ९

वनमाली० टी० ॥

अन्ये शल्यकृतवर्मादयः मदर्थे त्यक्तजीविता ये ते भवदाद-
यः नानाविधानि शस्त्राणि प्रहरणानि युद्धसाधनानि येषां
ते युद्धविशारदाः कुशलाः ९ ॥

गी॰
टी॰
ग्र॰

37

न विद्यसि चेन्मत्कृते ये सर्वं रक्ष्यन्ति एवं न त्वया विना किं स्या दित्यभिप्रायः शकुनिभागिनेयस्य तत्सुतस्य ॥

"किमेतावन्त एव ना यकानेत्याह ॥"

उत्तमवैजयन्ती टी॰

किं चैतावन्त एव नायका न सन्तीत्याह अन्येऽपि जयद्रथकृतव
र्मशल्यादयो मदर्थे त्यक्तजीविता मत्प्रयोजनाय त्यक्तप्राणा यैर्म
यि स्नेहाधिक्येन स्वस्वमरणमप्यङ्गीकृतं वक्तुरित्यर्थः नाना
शस्त्रप्रहरणा नानाऽनेकविधानि शस्त्राणि खड्गादीनि प्रह
रणानि येषां ते तथा युद्धविशारदाः युद्धकर्मणि पटुतराः ए
तादृशा बहवोऽन्ये केऽपि सर्वे शूरास्सन्त्यत्र स्वयुद्धे ॥ ॥

मधुसूदनी

अन्ये च शल्यकृतवर्मप्रभृतयः मदर्थे मत्प्रयोजनाय जीवित
मपि त्यक्तुमध्यवसिता इत्यर्थः त्यक्तजीविता इत्यनेन स्वस्मि
न्ननुरागातिशयस्तेषां कथ्यते एवं स्वसैन्यबाहुल्यं तत्स स्व
स्मिन् भक्तिं शौर्यं युद्धोद्योगं युद्धकौशलं च दर्शितं शूरा इत्या
दिविशेषणैः ९ ॥

सदानंदी

अन्ये शल्यादयोऽनेके शूरा मत्प्रीतिसाधकाः मत्प्रयोजनसि
द्ध्यर्थं जीवितं त्यक्तुमुद्यताः १ एवं स्वसैन्यबाहुल्यं स्वस्मिंस्त
त्परतां परा युद्धोद्योगारणोदार्यं च तुर्भिर्दर्शितं पदैः ३। ९

नीलकंठी ॥

अन्ये शल्यकृतवर्मप्रभृतयः शस्त्राणि विदारकाणि खड्गादी
नि प्रहरणानि केवलं प्रहारार्थानि गदादीनि नानाविधानि
येषां ते नानाशस्त्रप्रहरणाः ९ ॥

आनंदी टीका

अन्ये शल्यकृतवर्मादयः त्यक्तेत्यादिकर्मकाः मत्प्रयोजने
जीवितमपि त्यक्तुमुद्यता इत्यर्थः ९ ॥

रामकंठी टीका ॥

स्पष्टार्थम् ९ ॥

लासिकी [illegible] टी. ॥

अन्ये च भगदत्तशल्यकृतवर्मादयो बहवः शूराः सन्ति मन्नि
मित्ते जीवितमपि त्यक्तुं व्यवसिताः कुशलाः ९ ॥ नानाशस्त्रप्रहरणाः

रणवीरसमिद्बोधिनी ॥

अथपरिशिष्टान्यपि गणयति अन्ये चेति न केवलमेतावंत एवा-
न्ये जयद्रथकृतवर्मवाह्लीकप्रभृतयोऽप्येवंविधा इति भावः शूराः
ह्रस्वपांशुवनभुक्कोपनकलिप्रीताश्च जिह्मेक्षणा ये केचिद्धकना
सिकाश्च सततं हृष्टास्तथा कामिनः ये कासारविरोधयो हरिणक
न्मनन्तकावारणाक्षाः प्रोद्दालिकपंककर्णाकलिताः शूराणनवे
लौहिताइत्याचार्यपादैर्निरूपितइत्वायाहुः अन्वनुमापितदत्तप्रजाम्बु
वितप्रोत्साहकारणीभूतांतरसत्वविशिष्टाः तथा च मार्कंडेयः
मोभावः शुकनासाश्च ये च जिह्मेक्षणा नराः संहतभ्रूयुगाश्चैव को
पनाः कलहप्रियाः नित्यं हृष्टाश्च हृस्वाश्च शूरा ज्ञेयाश्च कामिन इति
वनभुवः संहतभ्रूयुगाः कोपनाः सदैव ललाटबद्धभ्रूवलयः क
लिप्रीताः कलहप्रियाः सततं हृष्टाः संयतो विषयतोऽपि वश्यसत्त्वमन
सः कामिनो रणवार्ताभिलाषिणः कासारविरोधयो महिषश्री
वाः हरिणकन्मन्मत्तकाः सिंहगकउक्तसदृशा वक्त्राः वारणा

त्वाद्दक्तिनेत्राः प्रोक्तेनालिकेनललाटेनपांडुसदृशाकर्णाभ्यांव
कलिताउपलक्षिताः रक्तनखाः नरुमेस्पर्शैरपोनाकृतिमात्रेणां
नरसत्वाइतिज्ञेयाइतिलक्षणाश्लोकार्थः प्रोक्तंपद्यंनिगदव्याख्यातं
९॥

रामचंद्रसरस्वतीकृतटीका ॥ स

रामचंद्रसरस्वतीकृतटीका ॥ स

श्रीवैसैन्यनायककथं नं स्वसैन्यबाकुलं [illegible] सस्मिन्नाक्लि

गुयेगे[illegible] सर्वशास्त्रप्रवीणतांयुद्धकौशलं न वेत्पने

नदर्शितम ४ ॥

39

भाषा अनुवाद

अब कहते हैं कि और औरभी धीर वीर सूर जो मेरे अर्थ प्राण परित्याग करनेको निश्चय करि राखेहैं और नाना प्रकारके शस्त्र चलानेवाले युद्धविद्यामें विशारदकहे अति निपुणवे सब लोगभी इयरहैं ९ ॥

दोहा

औरबहुतजोसूरहैंतजेंप्राणममहेत जानेशस्त्रप्रहारबहु
नानायुद्धसचेत ९॥

40

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं पर्याप्तं
त्विदमेतेषां बलं भीमाभिरक्षितं १० ॥

भाष्यं नास्ति

आनंदगिरिकृतटीका ॥

राजा पुनरपि स्वकीयभयाभावे हेत्वन्तरमाचार्यं प्रत्यावेदयति
अपर्याप्तमिति अस्माकं तत्त्विदमेकादशसंख्याकाक्षौहिणी
परिगणितमपरिमितं बलं भीष्मेण च प्रथितमहामहिम्नासू
क्ष्मबुद्धिना सर्वतो रक्षितं पर्याप्तं परेषां परिभवे समर्थं एतेषां
पुनस्तद्बलं सप्तसंख्याकाक्षौहिणीपरिमितं बलं भीमेन च च
पलबुद्धिना कुशलताविकलेन परिपालितमपर्याप्तमस्मा
कमभिभवितुमसमर्थमित्यर्थः अथवा तदिदमस्माकं बलं
भीष्माधिष्ठितमपर्याप्तमपरिमितमक्षोभ्यमेतेषां पा
ण्डवानां बलं भीमेनाभिरक्षितं पर्याप्तं परिमितं सोढुं शक्य
मित्यर्थः अथवा तत् पाण्डवानां बलमपर्याप्तं नालमस्मा
कमस्मभ्यं भीष्माभिरक्षितं भीष्मोऽभिरक्षितोऽस्मै परबलनि
हत्यर्थमिति तदेव तथोच्यते इदं पुनरस्मदीयं बलमेतेषां पा
ण्डवानां पर्याप्तं परिभवे समर्थं भीमाभिरक्षितं भीमो दुर्बल
हृदयो यस्मादस्मै परबलनिहत्यर्थमभिरक्षितः तस्मादस्मा
कं न किंचिदपि भयकारणमस्तीत्यर्थः १० ॥

स्वामिकृतटीका ॥

ततः किमित्यत आह अपर्याप्तमिति तत्तथाभूतैर्वीरैर्युक्तम
पि भीष्मेणाभिरक्षितमप्यस्माकं बलं सैन्यमपर्याप्तं तैः सह
योद्धुमसमर्थं भाति इदं तु एतेषां पाण्डवानां बलं भीमेनाभिरक्षि
तं सत् पर्याप्तं समर्थं भाति तथा सैन्यद्वयपरिकलनस्य प्रयोज मे
नमाह तत्पाण्डवानां बलं सैन्यं भीष्मेण सेनापतिनाभिरक्षित
मस्माकं बलं त्वपर्याप्तमपरिपूर्णं संख्यया सामर्थ्येन च पर्व
त्वस्माकं बलं पुनरेतेषां पाण्डवानां बलं भीमाभिरक्षितं प्रतिप॰
र्याप्तं भीमस्यैकपक्षपातित्वादेतेषां बलं समर्थं भाति भीष्मस्यो
भयपक्षपातित्वादस्माकं बलमसमर्थं भातीति दुर्योधनस्या

गी. भिप्रायः १ ॥ रामानुजभाष्यम् ॥ आदिश्लोकगतार्थम्
टी. महतिसंकटेनिपतितौ त्रैलोक्यं वंपर्यगैतौ ॥ १ ॥
प्र. किंवा नेनपरिगणनेन इदं अभिनवगमकृतटीका ॥ तावदस्तु नत्वमित्याह
अपर्याप्तमिति भीमसेनाभिरक्षितंपाण्डवीयंबलमस्माकं मपर्याप्तं जेतुमशः
क्यं अथवाः पर्याप्तं किंयत्तदस्मद्बलस्येत्यर्थः इदंतुभीष्मा
भिरक्षितंबलमस्माकंसंबंधि एतेषांपाण्डवानांपर्याप्तं जेतुंश
क्यं यदिवापर्याप्तंवक्ष्यनसमरेजयामेतेरिति १ ॥
न्या परमार्थप्रपा टी. ॥
अथसैन्यद्वयोपमास कारणमाह अपर्याप्तमिति तदुहि ह
मस्माकंबलंसैन्यंभीष्माभिरक्षितमपर्याप्तमसंपूर्णं तैः
सहयोद्धुमसमर्थं तथाएतेषांपाण्डवानांबलंसैन्यंभीमाभि
पर्याप्तं रक्षितंसत्पर्याप्तंसंपूर्णंयोद्धुंसमर्थम् १ ॥
पर्यायः वनमाली टी.
नो ततःकिमतआह अपर्याप्तमिति तदस्माकमपर्याप्तंपाण्डवानां
विजयेऽसमर्थंभाति यद्धेतोरुदासीनेनभीष्मेणाभिरक्षितं
एतेषांपाण्डवानांतुबलमस्मद्विजयेपर्याप्तंसमर्थंभातियतो
भूनातिनिविष्टेनभीमेनरक्षितं १ ॥
अनुमवैजयन्ती टी. ॥
एवमाचार्यवचनमुक्तेदानींपितामहेकटाक्षेणसर्वत्राचार्य
मप्याह अपर्याप्तमितिद्वाभ्यां भीष्माभिरक्षितं भीष्मेनसेना
पतिना भितः सर्वतोरक्षितमस्माकंसर्वेषांबलंसैन्यं अप
र्याप्तमसमर्थमहंमन्ये एतोभीष्मस्यास्मत्तः तेषांपाण्डवेष
अधिकतमस्नेहइतिभावः अथवा एतेषांबलंपरेषांसैन्यंपर्याप्तमसम
समर्थिकं यस्माद्भीमेनाभिरक्षितं भीमस्यस्वामिनेवातुरा
गातिरेकेनस्वबलपालनार्थेत्वाद्यतत्वात् १ ॥
राजा पुनरपि सैन्यद्व
यसाम्यमापृ
च्छ स्वसैन्याधि
क्यमावेदयति
अपर्याप्तमनेनतमेकादशाक्षौहिणीपरिमितं
भीष्मेणचप्रार्थितमहिम्नातस्मद्विनाभितः सर्वतोरः
क्षितंतनाहशगुणवत्सकलाधिष्ठितमस्माकंबलं एतेषांपा
मधुसूदनी ॥

डवानांबलंतत्पर्याप्तंपरिमितंसप्ताक्षौहिणीमात्रात्मकत्वा
दल्पंभीमेनचातिचपलबुद्धिनारक्षितं तस्मादस्माकमेव
विजयोभविष्यतीत्यभिप्रायः अथवातत्पांडवानांबलमप
र्याप्तंनालमस्माकमसमर्थं कीदृशंतत् भीष्माभिरक्षितोस्मा
भिर्यस्मैयन्निहन्तव्यमित्यर्थः तत्पांडवबलंभीष्माभिरक्षि
तं इदंपुनरस्मदीयंबलमेतेषांपांडवानांपर्याप्तंपरिभवेसम
र्थंभीष्मोतितुच्छबलहृदयोभिरक्षितोयस्मै तदस्माकंबलंभी
ष्माभिरक्षितं यस्माद्भीष्मोत्पयोग्यएवतन्निहन्तव्यं तैरक्षित
त्वस्माकंनकिंचिदपिभयकारणमस्तीत्यभिप्रायः ९ ॥

सदानंदी टी॰ ॥

स्वसैन्याधिक्यमेवाहराजादुर्योधनोधुना अनेनतंसैन्यमस्मा
कंसंख्ययास्वल्पत्वनतया १ सर्वतोरक्षितंयस्माद्भीष्मेनोदारबुद्धि
ना पांडवानांबलंस्वल्पंयत्सप्ताक्षौहिणीयुतं २ रक्षितंसर्वतो
यस्माद्भीमेनाप्यल्पबुद्धिना यद्वापांडवसैन्यंतन्निवर्त्यंहृत्स्न
बुद्धिना ३ अस्मदीयंतत्तत्सैन्यंनिवर्त्यंचलबुद्धिना असमर्थ
मितंतेषांबलमसमत्पराभवे ४ समर्थंतुतदस्माकंबलमत
त्पराभवे इतिवान्यत्समानंतत्सर्वमत्रापियोजितं ५ निश्च
येनततोस्माकंजयएवभविष्यति ६ ९ ॥

नीलकंठी टी॰ ॥

पर्याप्तंपरितःप्राप्तंपरिवेष्टितं पांडवसैन्यंहिसप्ताक्षौहिणीमि
तत्वादल्पंबहुनैकादशाक्षौहिणीमितेनास्मत्सैन्येनैववेष्टयि
तुंशक्यंनतत्तदीयेनास्मदीयमित्यर्थः एवंचपर्याप्तमित्य
स्यपारणीयमित्यर्थः ९ ॥

आनंदी टीका

एवमुभयोः सेनयोः नायकौ निर्दिश्य सारासारतां निरूपयति
भीष्मेण सर्वथा दक्षतायुक्तेन रक्षितमस्माकं बलं तदस्माका
रणाय पर्याप्तमपरैर्वारयितुमशक्यम् तत्पुनः भीमेन क्रोधने
नात्यन्तमभिज्ञेन रक्षितमेतेषां पांडवानां बलं पर्याप्तं वारयितुं श
क्यम् तथा च कोशः पर्याप्तिः स्यात्परित्राणहस्तवारणमित्य
पीति १० ॥

रामकंदी टीका

स्पष्टार्थम् १० ॥

लासिकी [illegible] टीका

र्कवलं अलं भावाविषयं अभूतं एकादशाक्षौहिणीबहुलत्वात् भी
ष्मेण ऊहापोहिना नीतिकुशलेन सर्वतो रक्षितं तु पांडवानां बलं
अलं भवगोचरं परिमितं च भवति सप्ताक्षौहिणीपरिमितत्वा
त् [illegible] भीमेन नीत्यनभिज्ञेन युद्धविषयहृतिना दिनस्व
अत्र वचनायायमर्थोप्युपलभ्यते एतेषां पांडवानां बलं भीमा
भिरक्षितं अस्माकं बलं भीष्माभिरक्षितं अत्र भीष्मस्योभयपक्ष
पातित्वात्स्वार्थे बलं पांडुसेनायाश्च तत्तेषामेव बलं पर्याप्तं विज
यीति कटाक्षः १० ॥

रणवीररसमिद्धोधिनी॥

पुनरपि स्वेयभयाभावे हेत्वंतरं स्वसैन्याधिक्यं चाचार्यं प्रत्यावेदय
ति अपर्याप्तमिति तत्तादृशावीरपुरुषाधिष्ठितं भीष्मेण सर्वत्र प्र
सिद्धमहामहिमवताभितो रक्षितमस्माकं बलं अपर्याप्तमेकादश
अक्षौहिणीपरिमितत्वाद्बहु एतेषां त्विदमति चपलप्राय पुरु
षं बलं भीमेन केवलमात्मऊर्जितं भवितव्याद्युद्धाकुशलेन पालितं

पर्याप्तं सप्ताक्षौहिणीपरिमितत्वादल्पमिति महदिदं तदस्माकमे
तेषां च बलमिति विजयोऽस्माकमेवेति यद्वा अस्माकं खल्विदमे
कादशाक्षौहिणीपरिमाणं बलं पर्याप्तं रिपुघाते न समर्थं यतो
भीष्मेणात्स्वगुरोरपि भार्गवस्य युद्धसाधनमनादृत्य कृत्वाव्ययम
तयादृढनिश्चयेनान्वर्थाभिधानेन देवव्रतेन पालितं एतेषां
पुनस्तत्सप्ताक्षौहिणीपरिमितं बलमपर्याप्तं परपराभवे सम
र्थम् यतो भीमेन भियं मिनोत्यवगमिनोति परेभ्यः सकाशाद्भीम
इति व्युत्पत्तेरतिभीरुस्वभावेन भीमसेनेन पालितमिति नाहमेते
भ्यो बिभेमीति भावः यद्वा तदिदमस्माकं बलमपर्याप्तं जेतुमश
क्यं यतो भीष्माभिरक्षितं एतेषां पुनर्बलं पर्याप्तं परिमितत्वात्सो
ढुं शक्यमिति एवं स्वसैन्याधिक्यस्वीयभयाभावप्रतिपादनाभि
प्रायेण प्रयुक्तापि दुर्योधनेनोक्तिर्हृषीकेशमानुरञ्जीत पाण्डवसे
न्योत्कर्षस्वीयभययोः तैरेव पदैः स्फुटं प्रतिपत्तेर्विपरीता संह
मा यद्वा तदस्माकं बलमपर्याप्तं शत्रुपराभवे समर्थं यतो भीष्मे
णोभयपक्षपातिनाभितः सम्यग्विवासहस्यैव रक्षितं नत्वांतर
हन्या पाण्डवानां यमश्लीलतया तत्रैव स्नेहस्योचित्यात् एतेषां पु
नरिदं बलं पर्याप्तमस्मज्जये समर्थम् यतो भीष्मेणैकपक्षावलंबि
नाभितः सर्वतो रक्षितमिति एतदाकूतेनैव भीष्ममेवाभि
रक्षंतु विभुजनो किं तस्यैव समाक्रोशतीति १०॥

श्री

रामचंद्रसरस्वतीकृतटीका ।

यस्मादस्माकंबलेभीष्मरक्षितमनंतंपांडवबलंतुलघीयसाभीमे
नरक्षितंस्वल्पंतस्मात्काकथातद्विजयायेत्वपर्याप्तमित्यनेनो
क्तं पूर्वंभागमारभ्यदुर्योधनेद्रोणंप्रत्युक्तवानत्रतुकिंचिद्वक्तुं
वानितिदर्शयन्संजयोदुर्योधनोक्तंसैनिकादेशंकथयति १०

भाषा अनुवाद

इसके अनन्तर दुर्योधनने जो कहा सोई धृतराष्ट्रसे संजयक
हतेहैं कि ऐसे ऐसे शूरवीरोंसे भरी हुई और भीष्मपितामह से
रक्षितहोकेभी हमारी सेना अपर्याप्तकहै पाण्डवकी सेना
के साथ युद्धकरनेमें असमर्थ जानी जातीहै और विपक्ष पा
ण्डवोंका अपूर्णदल आलसी भीमसेन से रक्षित पर्याप्त अर्थात्
समरमें समर्थ सा देखपड़ैहै दूसरा अर्थ दुर्योधन अपने
हृदयकी निडरता प्रकाश करते द्रोणाचार्यसे कहतेहैं कि
हमारा ग्यारह अक्षौहिणी सैन्य दल महात्मा बुद्धिमान पि
तामह जिसकी हरतरहसे रक्षा करतेहैं निसन्देह शत्रु
ओंका पराभव करनेको समर्थहै और इन विचारोंकी एक
तो सात अक्षौहिणी मात्र थोडी सेना दूसरे चपलबुद्धि म
हा गवांर भीमसेनसे परिपालित कहो हमारा सामना
क्या करेगी पराभव करना तो दूरहै १० ॥

सोरठा ॥

भीष्महमरीरक्षअप्रमाणसेनाबहुत भीमरक्षबहुतक्ष
इनकीसेनाजानिए १० ॥

अयनेषु च सर्वेषु यथाभागमवस्थिताः भीष्ममे
वाभिरक्षन्तु भवन्तः सर्व एव हि ११ ॥

भाष्यंनास्ति आनंदगिरिकृतटीका ॥

स्वकीयबलस्य भीष्माधिष्ठितत्वेन बलिष्ठत्वमुक्त्वा भीष्मस्यैव
त्वेन तदनुगुणत्वं द्रोणादीनां प्रार्थयते अयनेष्विति कर्तव्यवि
शेषद्योती चशब्दः समरसमारम्भसमये योद्धॄणां यथाप्रधानं
युद्धभूमौ पूर्वापरादिदिग्विभागेनावस्थितिस्थानानि नियम्यन्ते
तान्यत्रायनान्युच्यन्ते सेनापतिश्च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठ
ति तेषु सर्वेषु प्रकल्पितं प्रविभागमपरित्यज्य भवान् अश्वत्था
मा कर्णश्चेत्येवमादयो भवन्तः सर्वेऽवस्थिताः सन्तो भीष्ममेव से
नापतिं सर्वतो रक्षन्तु तस्य हि रक्षणे सर्वमस्मदीयं बलं रक्षितं
स्यात् परबलनिवृत्यर्थत्वेन तस्यास्माभीरक्षितत्वादित्यर्थः ११

स्वामिकृतटीका ॥

तस्माद्भवद्भिरेवं वर्तितव्यमित्याह अयनेष्विति हि यस्मात्सर्व एव भ
वन्तो भूयेवीर्येण प्रभवन्तो वा वीराः सर्वेषु समस्तप्रकारेषु अयने
षु च मार्गेषु गोमूर्तिकादिव्यूहस्थानेषु सर्वेषु यथाभागं व्यूहभा
गमनतिक्रम्य विभक्तां स्वां स्वां रणभूमिमपरित्यज्यावस्थिता वर्तमानाः
सन्तो भीष्ममेव सेनानायकमभितः सर्वतो रक्षन्तु स्वव्यूहाद्व्या
या पिपालयेत यथान्यैर्युध्यमानः पृष्ठतः कश्चित् न हन्यते त
था रक्षन्तु भीष्मबलेनास्माकं जीवनमिति भावः ॥ ११ ॥

रामानुजभाष्यम् ॥ स्यादिश्लोकगतार्थम्

श्री [illegible] ११ ॥

अभिनवगुप्तकृतटी· ॥

अयनानि विषयः ११ ॥

परमार्थप्रपाटी· ॥

तस्माद्भवद्भिरेवं कर्तव्यमित्याह अयने [illegible] इति अयनेषु व्यूह
प्रवेशमार्गेषु यथाभागं रणभूमिं विभज्य स्थिताः सन्तः सर्वेऽपि भ

गी॰
टी॰
प्र॰

वेतो भीष्ममेवेत्यभितः समंततो रक्षंतु तस्य व्यूहं प्रविष्टस्य ब
हिरक्षन्तु ॥ ॥ वनमाली ॥
अतो भवंतः सर्व एव व्यूहप्रवेशमार्गेषु यथाभागं स्वस्वभागम
परित्यज्यावस्थिताः संतः युध्यमानाः एषतः केश्चिन्न हन्ये
त तथा भीष्ममेवाभिरक्षंतु भीष्मबलेनैव वयं जीवाम इति
वः ॥ ॥
उक्तमेव जयन्ती टी॰ ॥
ततः किं कर्तव्यमित्यपेक्षायामाह अयनेष्विति सर्वेषु अयनेषु
युद्धारंभे व्यूहरचनानंतरं वीराणां यानि यान्यवस्थितिस्थाना
नि रूप्यंते तान्ययनशब्देनोच्यंते तेषु तेषु अयनेषु स्थानेषु य
भागं स्वं स्वं स्थानमपरित्यक्त्यावस्थिताः संतः सर्वे भवंतो भीष्ममेवा
भितो रक्षंतु हि यस्मात्कार्यसमर्थः सेनापतिरक्षणेन सर्वस्य बल
रक्षा स्यादित्यभिप्रायो दुर्योधनस्य ॥ ॥

प्रयत्नासमंतं श्रीपालितं तु रतो दृष्ट्वा नितरां तु देहो पितामहः यथा मरणभयादितो भूयालं न व कन्याया सर्वं दिव्यं सस ज्ञमानो नितरां तुष्यन्नलमेवं तु तु धनो वेदु पहासता भविष्यति त्यवं पितामहस्य पितनिन्दायेत रीति तस्य कथं मया मच्छसीति ॥

एवं चेन्निर्भयोसि तर्हि किमिति बहु जल्पसीत्यत आह

मधुसूदनी ॥
कर्तव्यविशेषद्योती तु शब्दः समरसमारंभसमये योधानां य
प्रधानेषु युद्धभूमौ पूर्वापरादिदिग्विभागेनावस्थितिस्थानानि नि
नियम्यंते तान्ययनान्युच्यंते सेनापतिश्च सर्वसैन्यमधिष्ठा
मध्ये तिष्ठति तत्रैवं सति यथाभागविभक्तां स्वां स्वां रणभूमिम
परित्यज्यावस्थिताः संतो भवंतः सर्वेपि युद्धाभिनिवेशात्पुरतः
पृष्ठतः पार्श्वतश्चानिरीक्षमाणं भीष्मं सेनापतिमेव रक्षंतु भी
ष्मे सेनापतौ रक्षिते तत्प्रसादादेव सर्वं सुरक्षितं भविष्यतीत्य
भिप्रायः ॥ ॥
मदानंदी टी॰
एवं चेन्निर्भयोसि त्वं किं कृत्वा बहु जल्पसि इत्यत्राह तु शब्देन
तेव्यं द्योतयन्नपः १ संग्रामारंभसमये युद्धभूमौ यथाय
पूर्वादिदिग्विभागेन वीराणां स्थितिभूमयः २ नियम्यंते
प्रोक्ता अयनानीति तेषु च सर्वसैन्यमधिष्ठाय मध्ये तिष्ठ
न्यपाः ३ यथाभागं विभक्तं स्वां स्वामन्यकारणानीति म
वस्थिताः संतः पुरतः पृष्ठतः पार्श्वतः ४ निरीक्ष्यमाणं भीष्मं

र्वेरक्षंतुसैन्यपाः भीष्मसेनापतौसर्वैरक्षितेतस्मात्त्वरक्षितं ५
॥ ११ ॥ नीलकंठी टी.
अयनेषुव्यूहरचनयावस्थिते सैन्यप्रवेशमार्गेषुस्वेस्वस्थाने
स्थितायूयंमध्यस्थंभीष्ममेवाभिरक्षंतु अस्यसेनापतेश्चाच
ल्येसर्वापिसेनाकुलीभवेत् तत्स्थैर्येस्थिराचभवेदतःस
एवरक्ष्यइत्यर्थः ॥ ११ ॥

98

आनंदी टीका

ह्रियस्माद्भीष्मेणरक्षितमस्माकंबलंपांडवबलनिवारणेसम
र्थम् अतःसर्वेष्वयनेषु व्यूहरचनायांपूर्वापरादौवीराणांप्र
वेशनिर्गममार्गेषु यथाभागंस्वस्वभागेवास्थिताःसावधानाः
संतःसर्वएवभवन्तोभीष्ममेवाभिरक्षन्तुभीष्मेरक्षितेसर्वका
र्यंसिद्ध्यतीत्यर्थः ११ ॥

रामकंठी टीका

स्पष्टार्थम् ११

लासिकी [illegible] टीका

तस्माद्भवद्भिरेवंवर्तितव्यमित्याह अयनेष्विति वीथिषुक
क्षास्व व्यूहविभागमनतिक्रम्यसन्तःसर्वएवभवंतोवीराः भीष्ममेव सर्वसेनाधिष्ठानंपालयन्तु॥
अत्रापीयंसूचना भीष्मस्यपांडवसेनायामपिप्रेम तस्माद्यथा
नायंभीष्मःपांडवैःसहसंगच्छति तथाभिरक्षणंत्वेक्षताभवंतः
कुर्वन्त्वित्यर्थः ११ ॥

रणवीरसमिद्बोधिनी॥

ततश्चकिंकर्तव्यमित्याह अयनेष्विति समरसमारंभसमये यो
धानांयथायथानंयुद्धभूमौपूर्वापरादिविभागेनावस्थितिस्थाना
नियानि नियम्यंते तान्ययनान्युच्यंते सेनानीश्चात्रसर्वसैन्यम
धिष्ठायमध्येतिष्ठति यथोक्तमाचार्यपादैः व्यूहस्तत्रचपंचधैव
कल्पनासर्वेषुपक्षावुभौ तदन्यावपितावुरस्यश्चतत्रोपश्लेष्यतेःका
मतइति अत्रार्थः व्यूहःसूत्र्याध्याये उक्तास्तेषुसर्वेषुकल्पनाक
ल्पनासैनिकविभागइतियावत् पंचधैव यथा उभौद्वौभागौपक्षौ
कार्यौपक्षवन्यावपितावुभौकार्यावितिचत्वारोभागाः पंचमस्तु
परिशिष्टोभागउरस्य उरोदेशस्थितोविधेयइतिपंचविभागे:

पंचदशोद्धसैनिकाः स्याप्या इत्यर्थः युध्येचुनैः कामत इत्यत्रानुप
योगान्नव्याख्यायते ॥ यथाभागमिति विभक्तां स्वांस्वां रणभू
मिमपरित्यज्यावस्थिताः संतो भवंतः सर्वेपि भीष्ममेव सेनाप
तिमभितः सर्वतो रक्षंतु माकश्चिदेनं दृष्टं तपत्यावधीदिति
पतद्रक्षणमेवास्माकं जीवनमिति भागावस्थितिश्च भारते गरु
डव्यूहस्य तुंडे आसीद्देवव्रतस्तथा चक्षुषी तु भरद्वाजः कृतवर्मा च सा
त्वतः अश्वत्थामा कृपश्चैव शीर्षमास्तां यशस्विनौ त्रिगर्तैर्मत्स्यकै
केयैर्वाटधानैश्च संयुतौ भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष
मद्रकाः सिंधुसौवीरास्तथा पंचनदाश्च ये जयद्रथेन सहिता ग्रीवा
यां सन्निवेशिताः पृष्ठे दुर्योधनो राजा सोदर्यैः सानुगैर्वृतः विन्दा
नुविन्दावावंत्यौ कांबोजाश्च शकैः सह पुच्छमासीन्महावीरः शूर
नाश्च सर्वशः मागधाश्च कलिंगाश्च दाशेरकगणैः सह दक्षिणं प
क्षमाश्रित्य स्थिता युद्धाय दंशिताः कानकाश्च विमुक्ताश्च मुक्ताः पु
ण्ड्रविषास्तथा बृहद्बलेन सहिता वामं पक्षमुपाश्रिताः इति कौरव
सेनावस्थितिविभागः अथ पांडवसेनावस्थितिविभागस्तत्रैव
धृष्टद्युम्नस्तत्सैन्यं सव्यसाची परंतपः धृष्टद्युम्नेन सहितः प्रत्यु
त संयुगे अर्थं वज्रेणाव्यूहेन व्यूढं तमतिदारुणं दक्षिणं शृंगमाश्रि
त्य भीमसेनो व्यरोचत नानाशस्त्रौघसंपन्नो नानादेश्यैर्नृपैर्वृतः
तमन्वेति विराटश्च द्रुपदश्च महारथः तदनंतरमेवासीन्नीलो नीला
युधैः सह नीलादनंतरं चैव धृष्टकेतुर्महारथः चेदिकाशिकरूषैः
पौरवैश्चाभिसंवृतः धृष्टद्युम्नः शिखंडी च पांचालाश्च प्रभद्रकाः म
ध्ये सैन्यस्य महतः स्थिता युद्धाय भारत तथैव धर्मराजोपि गजानीके
नसंवृतः ततश्च सात्यकी राजन् द्रौपद्याः पंच चात्मजाः अभिमन्यु
स्ततः इरावांश्च ततः परं भैमसेनिस्ततो राजन् केकयाश्च महा
ततोऽभूद्द्विरूपं पृष्ठे वामं पार्श्वमुपाश्रितः सर्वस्य जगतो गोप्ता गोप्ता यस्य जना
र्दनः एवमेतन्महाव्यूहं प्रत्यव्यूहंत पांडवाः इति ११॥

रामचंद्रसरस्वतीकृतटी.

अयनेष्विति हे अयनेषुतत्तद्व्यूहमार्गेषुयथाप्रदेशंव्यवस्थिताः
सैनिका भवंतःसर्वेयुद्धाभिनिवेशात्इतःइतःपार्श्वयोः
अनिरीक्षमाणंभीष्ममेवाभिरक्षंतु तस्मिन्रक्षितेनेकरक्षि
तएवविजयइतिभावः ॥ ११ ॥

50

भाषा अनुवाद

इससे अब तुम सब लोगोंको यही करना उचितहै कि शत्रुके
सैन्यदलके भीतर प्रवेश करनेका क्रमसे अलग अलग हो
अपनी अपनी रणभूमि पर खडे होकर भीष्मजीकी सब र
क्षाकरो जिसमे और कोई शत्रुकी ओरका योधा पीछेसे इ
नको न मारने सके इसको अभिप्राय यहहै कि भीष्मही
के बलसे हमारा जीवनहै ॥ ॥

सोरठा॥

यथास्थानस्थितह्वोय सर्व मार्गमे सर्वविध तुमसमकारजजो
य भीष्मकीरक्षाकरो ॥॥

51

तस्य संजनयन्हर्षं कुरुवृद्धः पितामहः सिंह
नादं विनद्योच्चैः शंखं दध्मौ प्रतापवान् १२ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

तमेवमाचार्यं प्रति संवादं कुर्वन्तं भयाविष्टं राजानं दृष्ट्वा तदभ्यास
वर्ती पितामहस्तदुत्साहनार्थं इत्थं कृतवानित्याह
तस्येति राज्ञो दुर्योधनस्य हर्षं बुद्धिगतमुल्लासविशेषं परपरा
भवद्वारा स्वकीयविजयद्वारकं सम्यगुत्पादयन्भयं तदीय
मपनिनीषुरुच्चैः सिंहनादं कृत्वा शंखमापूरितवान् किमिति
दुर्योधनस्य हर्षमुत्पादयितुं पितामहो यतते कुरुवृद्धत्वात्
तस्य कुरुराजत्वात् पितामहत्वाच्चास्य दुर्योधनभयापनयना
पेक्षा निरूपिता तदुपजीवितया तद्वशत्वाच्च तस्य सिं
हनादं शंखशब्दं च परेषां हृदयव्यथा सम्भाविते हर्षादेवाभि
निवहं प्रति भयजननलक्षणप्रतापत्वादित्यर्थः १२ ॥

स्वामिकृतटीका ॥

तदेवं द्रोणं प्रति राज्ञो भीष्मस्य बहुमानपुरस्सरं युद्धं कृतं कृत्वा
भीष्मः किं कृतवान् तदाह तस्येति कुरुवृद्धः पितामहो गांग
यस्तस्यैवं द्रोणं प्रति निरूपणं कुर्वतो दुर्योधनस्य राज्ञो हर्षं प्री
तिं संजनयन् उच्चैर्महान्तं सिंहनादं विनद्य कृत्वा सर्वसैन्यसंत्रा
सनं सिंहनादमिव नादं महाहासं कृत्वा शंखं दध्मौ आपूरितवा
नित्यर्थः प्रतापवान् १२ ॥

रामानुजभाष्यम् ॥ आदिश्लोकेषु गतार्थम्

ततोऽपि दिग्विजयकोलाहलस्य ॥ १२ ॥

अभिनवगुप्तकृतटी. ॥ १२ नास्ति

परमार्थप्रपा टी.

तस्येति एवमित्यादिभिस्तेजनवाक्यैः स्ववीरोत्साहीकृतवतो
दुर्योधनस्य हर्षमुत्साहं जनयन् कुरुषु कौरवसैन्येषु वृद्धः पि
तामहो भीष्मः प्रतापवान्स्वयमुत्साहवान् सिंहवद् हहासं कृत्वा

अथवा एवं त्वस्य व्यग्रता भाव...

फणिकंचुकवत् जीर्णं निजदेहस्य पातने दुर्योधनमतिमुपकारिणीं मन्यमानो आनंदेनोत्फुल्लसर्वांगस्तस्य
हर्षमेवाजनयन्न तु हर्षं तस्य संजनयन्निति यो गुरोरात्मनश्चावहेलनं कृतवांस्तस्याधमरूपस्य क्रूरस्वभावस्य पर
बलेक्षणजनितभयेनाचार्यमुपगतस्य तत्कपटज्ञात्रा गुरुणा वाङ्मात्रेणाप्यनादृतस्य दुर्योधनस्य गुरुरूपेणाज्ञा

गी.
टी.
प्र.

शंखं दध्मौ वादितवान् १२ ॥

वनमाली टी. ॥

स्वस्मिन्दत्तभारस्य राज्ञो हर्षं संजनयन् कुरुवृद्धो भीष्मः सिंहनादं
कृत्वा शंखं दध्मौ १२ ॥

अत्रमैवजयन्ती टी. ॥

ततो दुर्योधनेन राज्ञा ममत्वहर्षवर्धकसेनाधिष्ठातृत्वेन सर्ववीरा
धिकाबाधकत्वेन चात्मनः सर्वधूर्वहत्वगर्भवचनमुक्तं भीष्मादि
शब्दात्मा हयुक्तः श्रुत्वा राजानमपि हर्षयुक्तं कृतवानित्याह
संजयस्तस्येति हर्षं बाह्यान्तःकरणगतानंदविशेषं जनयन्नु
त्पादयन् सिंहनादं सिंहवदुच्चैर्महच्छब्दं विनद्य कृत्वा पितामहो
हो भीष्मः शंखं दध्मौ वादितवान् कुरुवृद्धः बुद्धिबलपौरुषास्त्र
शास्त्रविद्याजन्मभिः सर्वेषां कुरूणां मध्ये वृद्धः श्रेष्ठतमो न तु
वीरमात्रेण प्रतापवानिति तेजस्वी कुरुवृद्धत्वेन पितामह
हत्वेन चास्योभयथापि वैषम्याभावादानंदकत्वं सूचितं प्रतापवा

“लोतुव्यानिंद तुवाएतद्दो
दः पतिष्यत्येवेत्याशये
नं हर्षयन्नेव सिंहनादं
शंखं चाचैव कृतवानित्याह

त्त्वेन स्वशक्त्यास्तुत्वादस्य भयप्रदकाले शोऽपि नास्तीति
सूचितम् १२ ॥ मधुसूदनी ॥
एवं पांडवसैन्यदर्शनादतिभीतस्य भयनिवृत्त्यर्थमाचार्यकप
टेन शरणागतस्य इदानीमप्ययं मां प्रतारयतीति संलापवशादा
चार्येण वाङ्मात्रेणाप्यनादृतस्याचार्योपेक्षां बुद्ध्वा ने ष्टिप्यादिना

उ
ने
य

भीष्मस्य च वृत्तं तस्य राज्ञो भयनिवर्तकं बुद्ध्वा यने ष्टिप्यादिना
विशेषस्वविजयसूचकं जनयन् उच्चैर्महान्तं हर्षं बुद्धिगतमुल्लास
त्वा सिंहनाद इति प्रमुलंतं प्रतीके पांचजन्यमीति सिंहनादं विनद्य कृ

द

त्वा पुनः प्रयोगः शंखं दध्मौ वादितवान् कुरुवृद्ध इति वनस्य व यायी
धनयोरभिप्रायः पवित्राने पितामहः कुरुवृद्धत्वादाचार्यदुर्यो
दुपेक्षणं प्रतापवत्वादुच्चैः सिंहनादपूर्वकशंखवादनेन त्वाचार्यव
त्पादनाय अत्र सिंहनादशंखवाद्ययोरेकशंखवादने परेषां भयो
कालत्वेऽप्यभिचरन्त्यजेनेति वजनयन्निति हर्षजनकत्वेन पूर्वापर
रूपवर्तमानत्वेन व्याख्यातव्यः १२ ॥ ज्ञातावश्यंभावित्व
सदानंदी टी. ॥

एवं संस्तुवतो भीष्मं राज्ञो विजयशंसकं उल्लासं जनयन्नुच्चैः सिं
हनादं महारवं १ कृत्वा प्रतापशङ्खं चाप्यवादितवांस्ततः कु
रुवृद्धतया चार्यभूपयोराशयज्ञता २ राज्ञो ऽनुपेक्षणं तस्य पिता
महतयोच्यते ३ १२ ॥

नीलकंठी टी॰ ॥

तस्य एवं वदतो दुर्योधनस्य संजयवाक्यमिदं सिंहनादमिति णमुलंते
तेन विनद्येत्यस्यानुप्रयोगः कषादित्वात् समूलकाषं कषति स
नेन समरसमारंभाय संवृत्ते सतीत्येतदुच्यते सेनयोरुभयोरपि
स्थितान् पार्थोऽपश्यदिति सम्बन्धः अथशब्दस्तथाशब्दपर्यायः
श्वशुरा भार्याणां जनयितारः सुहृदो मित्राणि कृतवर्मप्रभृत-
यः २६ ॥

स्वामिकृतटीका ॥

तत्रेति अथानंतरं पार्थोऽर्जुनस्तत्रोभ-
ततः किंवृत्तमित्यत आह तत्रेति अथानंतरं पार्थोऽर्जुनस्तत्रोभ-
योः सेनयोरपि स्थितान् पितॄन्याति पिबंति इत्युक्ते लालयंति वा
पत्यानीति पितरस्तान् पितॄन् अत्र च पितृकल्पाः पितृव्यादयः
पितृव्यानित्यर्थः पितामहान् गांगेयादीन् आचार्यान् द्रोणादी-
न् मातुलान् मात्रा जनन्या साम्यं येषां ते मातुलास्तान् भ्रातॄन्साद-
न्पुत्रान् पुत्रानन्योन्यकारात् पितॄणां त्राणात् पुत्रास्तत्पुत्राः पौत्रा-
स्तान् दुर्योधनादीनां ये पुत्राः पौत्रास्तानित्यर्थः सखीन् मित्राणि
सुहृदः कृतोपकारांश्चापश्यत् २६ ॥

रामानुजभाष्यम् ॥

तत्रापश्यत्स्थितान्पार्थ इत्यारभ्य एवमुक्त्वाऽर्जुनः संख्ये इत्यंतेन २६

अभिनवगुप्तकृतटीका ॥ २६ ॥ नास्ति

परमार्थप्रपा टी० ॥

तत्रापश्यदिति पितॄन् पितृव्यान् पितामहान् वृद्धानाचार्यान्त-
था मातृवत्पूज्यान् मातुलानिति पूज्यत्वकोटिः ॥ २६ ॥

वनमाली टी० ॥ उपक्रमे ॥ २६ ॥ नास्ति

उत्तममैवजयंती टी० ॥

एवं पश्यन्नित्यपेक्षायामाह तत्रेति भगवता सैन्यदर्शने आज्ञप्तः पार्थोऽर्जुनस्तत्रोभयोः सेन

एवं तु पार्थो महामनाः परमकारुणिको तिधार्मिकः कोमलमना भवद्भिरति घोरैर्मारयितुं जतुगृहादिभिरसकृद्वंचितोऽपि
परमपुरुषसहायोपि हनिष्यमाना न्भवदीयान्विलोक्य बन्धुस्नेहेन परमया च कृपया धर्मभयेन चातिमात्रं खिन्न-
सर्वगात्रः सर्वथा नयोत्स्यामि इत्युक्त्वा बन्धुविश्लेषजनित शोकसंविग्नमानसः सशरं चापमुत्सृज्य रथोपरि उपाविशत्
इति रामानुजभाष्यम्

गी॰ टी॰ प्र॰

योर्मध्येऽवस्थितान्सेनानपश्यदेत्तेत्यन्वयः

श्वशुरान्: पितॄन्पितृव्यान्भूरिश्रवादीन् मातुलान्शशुरपर्यायेणश्वा

दीन्पुत्रान्लक्ष्मणादीन् पौत्रान्लक्ष्मणादिपुत्रप्रभृतीन् शकुनिशल्या

न्समवयस्कानश्वत्थामप्रभृतीन् सखी २६ ॥

मधुसूदनी ॥

103

तत्र समरसमारंभार्थं सैन्यदर्शनेन भगवताभ्यनुज्ञाते सति सेन ष्ठ

योरुभयोरपि स्थितान्पार्थोऽपश्यदित्यन्वयः श्वशुरान्सखींश्च पर्या

यः परसेनायां पितॄन्पितृव्यान्भूरिश्रवःप्रभृतीन् पितामहान्भी नू३

ष्मसोमदत्तप्रभृतीन् आचार्यान्द्रोणकृपप्रभृतीन् मातुलान्श

ल्यशकुनिप्रभृतीन् भ्रातॄन्दुर्योधनप्रभृतीन् पुत्रान्लक्ष्मणप्र

भृतीन्पौत्रान्लक्ष्मणादिपुत्रान्सखीन्द्रश्वत्थामजयद्रथप्रभृ

तीन्वयस्यान् श्वशुरान्द्रुपदप्रभृतीन् सुहृदो मित्राणिकृत

वर्मभगदत्तप्रभृतीन् सुहृदइत्यनेन यावंतः कृतोपकारा माता

महादयश्चते द्रष्टव्याः एवं स्वसेनायामप्युपलक्षणीयम् ॥ एवं

स्थितेमहानधर्मो हिंसेति विपरीतबुद्ध्या मोहाख्यया शास्त्रविहि

तत्वेन धर्मत्वेन धर्मत्वमिति ज्ञानप्रतिबंधकेन च ममकारनिब

धनेन चित्तवैक्लव्येन शोकाख्येनाभिभूतविवेकस्यार्जुनस्य पूर्वम

र्व्याज्ञाख्यातस्वधर्मोऽपरिरंसा महानर्थपर्यवसायिनी दैवे

तिदर्शयति २६ ॥

सदानंदी ॥

एवं भगवताप्रोक्तः सेनयोरुभयोरपि पार्थोऽपश्यत्स्थितान्भूरिश्र

वआदीन्पितॄन्सखायांश्च पितामहान्भीष्मसुखान्कृपद्रोणसुखान्

गुरून् शल्यादीन्मातुलान्भ्रातॄन्दुर्योधनसुखान्बहून् २ लक्ष्म

णप्रभृतीन्पुत्राशनश्वत्थामसुखान्सखीन् पौत्रांल्लक्ष्मणपुत्रादीन्

श्वशुरान्बहून्तथास्थितान् ३ सुहृदः कृतवर्मादीनेवमेवस्वसैन्यके

एवंस्थितेयथाबुध्यास्वधर्मेऽधर्मरूपया ४ ॥

नीलकंठी ॥

पितॄन्पितृव्यादीन्भूरिश्रवःप्रभृतीन् पितामहान्भीष्मादीन्

मातुलान्शल्यादीन् भ्रातॄन्दुर्योधनादीन् पुत्रान्लक्ष्मणादी

न् पौत्रान् लक्ष्मणादिपुत्रान् सर्वान् प्रस्थान्यामादीन् २६ रुद्रः
कृतवर्मादीन् २६ रामचंद्रसरस्वतीकृतटीका ॥
तत्रेत्यारभ्यसार्धःश्लोकः ॥२६॥

104

आनंदी टीका

पितामहान् भीष्मसोमसोमदत्तादीन् [illegible] २६ आचार्यान् द्रोणकृपादीन्
मातुलान् शल्यशकुनिप्रभृतीन् पितृन्पितृव्यान् भूरिश्रवप्रभृतीन्
भ्रातृन्दुर्योधनादीन् पुत्रान्दुर्यो [illegible] सखीन्
अश्वत्थामादीन्

रामकंठी टीका

स्पष्टार्थ २६

लासिकी वस्युती टी.

तत्रपार्थः पश्यत्स्थितान् पितृनिति पितृकल्पान्पितृव्यादीन् सुहृदः कृतोपकारान्
२६ ॥

रत्नावीरसमिद्धोयिनी॥

ततः किंवृत्तमित्याह तत्रेति युद्धाय भगवदभ्यनुज्ञानेसतीत्य
र्थः ॥२६॥

105

भाषा अनुवाद ॥

तहां खड़े हुये चचा दादा आचार्य मामा भाई भतीजे पोता नाती और मित्र बन्धु ससुर सुहृदों को दोनों तरफ अर्जुनने देखा २६ ॥

दोहा ॥

देखें पारथ तहां खड़े पिता पितामह जोय भ्रात पुरोहित मातुल पुत्र पौत्र सखा सोय २६ ॥

106

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्
कृपया परयाविष्टो विषीदन्निदमब्रवीत् २७ ॥

आनन्दगिरिकृतटीका

भाष्यं नास्ति

मेनाह येष्ववस्थितान् यथोक्तान् पितृपितामहादीनालोक्य ।
परमकृपापरवशः सन्नर्जुनो भगवन्तमुक्तवानित्याह तानिति वि ति
षीदन् यथोक्तानां पित्रादीनां हिंसासंरम्भनिबन्धनं विषादमु
पतापं कुर्वन्नित्यर्थः २७ ॥

स्वामिकृतटीका ॥

श्वशुरानिति ततः किं कृतवानि
त्यत आह तानिति स कौन्तेयः अर्जुनः सर्वान् अविशेषेण बन्धून् नवस्थिता
बन्धेति पर स्परं तिह पाशौ रितिवंथ वस्तान् समीक्ष्य कृपया करुणया
यापरयाति शययाविष्टो व्याप्तो युक्तो विषीदन् विशेषेण सीद
न्नवसादं ग्लानिं लभमानः इदमनन्तरमुच्यमानमब्रवीत् किम
ब्रवीदित्यपेक्षायामाह ॥ २७ ॥

सा

रामानुजभाष्यम् ॥ उक्तक्रमम् २७

एवं कृपार्थो महात्मनाः ॥ २७

अभिनवगुप्तकृतटीका २७ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

म॰ अथ प्रेमास्पदानाह भ्रातॄन् दुर्योधनादीन् एकोत्तरशतमितान् अ
नु॰ थ कृपापात्राण्याह पुत्रान् पौत्रानिति दुर्योधनादीनां पुत्रान् पौत्रान् ।
दृश्यमानेषु तेष्वर्जुनः किमकरोदित्याह तानिति अथार्जुनः स्वनिर्वेदं
कथयति ॥ २७ वनमाली टी॰ ॥

त्वेत्यर्थः अथापरयाविष्टो व्याप्तः २७ ॥

कृष्णमवैजयन्ती टी॰ ॥

श्वशुरान् दुर्योधनादिश्वशुरान् सुहृदश्चेति पितामहादीनां सर्वे
षां विशेषणं यतो यावन्तः सर्वे कृतोपकारा भवन्ति तस्मात्सुहृदः
समवस्थितान्युद्धार्थं तत्रावस्थितान्बन्धून् ज्ञातीन् सर्वान् तान्समीक्ष्य

सः येन कृतसहायेन देवराजं विगण्य्य नन्दवात्ऽबतनमगूयेदत्तं येनैव रथेनोत्तरगोग्रहे
त्वदीयान्सर्वान्विजित्य सर्वेषां शिरोभ्य उष्णीषान्यपहृतानि योगन्थर्वैर्नीयमानं सस्त्रीकं दुर्यो
धनं युधिष्ठिराज्ञया नाज्ञितानिर्लज्जं त्वन्तुच्छ्रामीवयत्नः इत्यनेनासभयरक्षितत्वेनानिस्पृशिरोम
ऽणित्वमतिधार्मिकत्वं चोक्तं कौन्तेयः कृष्णलयस्य भगवतः पितृष्वसेय इत्यनेनास्यातिकृपालुता

सम्यगीक्षणविषयं कृत्वा, शत्रुविषयिणीयतस्ततः परयेति परया
निर्हेतुकया कृपयाविष्टो युक्तो, अत एव विषीदन् विषादं कुर्वन् इदं व
क्ष्यमाणं वचनमब्रवीदिति कौन्तेयो नेदवार्जुनस्य वचनं यथन गाढ
यसंजयोऽकथयत ॥ २७ ॥

मधुसूदनी ॥

एवं स्थिते महाननर्थो मोहहे
तुनिविपरीतबुद्ध्या मोहा
ख्यया शास्त्रविहितत्वेन
धर्मत्वमिति ज्ञानशक्तिप्र
यकेन च ममकारनिबंध
नेन चित्तवैक्लव्येन शोका
ख्येनाभिभूतविवेकस्यार्
जुनस्य एवं प्रारब्धायुद्धा
पात्स्वधर्मादुपरिरंसा
मा महानर्थपर्यवसायि
नी हेतुनिदर्शयति

कौन्तेय इति स्त्रीप्रभवत्वकीर्तनेन पार्थवत्तादात्मिकस्फटिकमपे
त्यकृपया कर्त्र्या स्वव्यापारेणाविष्टो व्याप्तो न तु कृपा केनचिद्व्या
पारेणाविष्ट इति स्वतः सिद्धैवास्य कृपेति सूचितमेतत्प्रकटीकर
णाय परयेति विशेषणं अपर इति वाच्छेदः स्वसैन्ये पुरापि कृपा भूदे
व तस्मिन् समये तु कौरवसैन्येऽप्यपरा कृपाभूदित्यर्थः विषीदन्वि
षादं दुःखं सन्तापं प्राप्नुवन्नब्रवीत् इत्युक्ति विषादयोः समकालतावद
नुसगद्गदकंठताश्रुपातादिविषादकार्यमुक्तिकाले द्योतयति ॥
[illegible] दीनतया अर्जुनेनोवाच
[illegible] अर्जुनः संवादः स्वधर्मप्रवृत्ति
कारिणीभूतनत्वज्ञानप्रतिबंधकः स्वपरदेहे आत्मात्मीयाभिमा
नवतोऽनात्मविदोऽर्जुनस्य युद्धे स्वपरदेहविनाशप्रसंगदर्शिनः
शोको महानासीदिति तल्लिंगकथनेन दर्शयति त्रिभिः श्लोकैः २८

सदानंदी ॥

ममत्वाविष्टयात्यंतमोहग्राहगृहीतया अभिभूतविवेकस्य स्वधर्मा
दर्जुनस्य च ५ धर्मायुद्धात्प्रारब्धान्महानर्थावसानिका संजा
तोपरिरंसेति दर्शयत्यधुना स्फुटं १ कृपया कर्त्र्या हि परया किंभूत
तोऽर्जुनो वशः व्यामोहनादि महामोहजन्यया यथा सहृपया ९ स्व
कीयात्वुपलभ्येते ममेत्याक्रांतमानसः संतापं प्राप्नुवन्नाह वक्ष्य
माणमिदं वचः ५ ॥ २७

नीलकंठी ॥

सुहृदः श्वशुरान्बंधूंश्च वदीक्ष ॥ २७ ॥ २८ ॥ २९ ॥
कृपया स्नेहेन स्वजनमिति विप्रलापपद पर्यंते २७ ॥

आनंदी टीका परया भूयस्या कृपया ममेते वन्धवो मुमूर्षव: कथं दर्शिताः स्थितिममताविवंधतया मतो विकृतंवनाविष्ट: विवीरतुपतापंशाग: इदं वाक्यमवतीत् ॥ २८

पितॄन् पितृव्यान् भूरिश्रवप्रभृतीन् पितामहान् भीष्मसोमदत्तादीन् आचार्यान् द्रोणकृपादीन् मातुलान् शल्यशकुनिप्रभृतीन् भ्रातॄन् दुर्योधनादीन् पुत्रान् दुर्योधनादिपुत्रान् सखीन् सख्यानादीन् कौन्तेयावस्थितान् समीक्ष्य २६ ॥

रामकंठी टीका

स्पष्टार्थ २६

कृपया ममाविष्टो व्याप्त इदं वक्ष्यमाणमब्रवीत् लासिकी टीका दीदन्य:

सुहृदः कृतोपकारान् ॥ स्पष्टमोर्थः २७ ॥

रणवीरसमुद्बोधिनी ॥

सेनयोरुभयोर्मध्ये स्थितानिति संबंधः पितृकल्याणित्वाशीन् सखीन् मित्राणि सुहृदः कृतोपकारान् ॥ २७ ॥

108

रामचंद्रसरस्वतीकृतटीका ॥

तानितिकौन्तेयइतिपार्थवत्कृपयाविष्टोनतुकृपामाविष्टोऽतो
नास्येयंकृत्रिमाकृपेतिद्योत्यते अपरयेतिछेदःस्वसेनायांकृपा
ह्देवतस्मिन्समयेकौरवेष्वपराकृपाभूदित्यर्थः विषीदन्नित्य
किविषादयोः समकालतांवदन्नुसगाह्नदेकंठतांविरिंश्योकिम
त्पातादिचाहृन्नयति ॥ २९ ॥

109

भाषा अनुवाद ॥

सो कुन्तीपुत्र अर्जुन उनसब बंधुवोंको लडनेके लिये संग्राम मेंखडे देखि परम कृपासे युक्त अति कातर स्वभाव हो विषाद करते भये यह वचन बोले ॥ २७ ॥

दोहा ॥

ससुर सुहृद बांधव सभीसेनादोउ मध्य तिन्हहूंको स्थित
देषके तहांपांडवसुतनहु २७॥

110

अर्जुन उवाच दृष्ट्वेमान् स्वजनान् कृष्ण युयुत्सून्
समवस्थितान् सीदन्ति मम गात्राणि मुखं च परि
शुष्यति २८ ॥ भाष्यं नास्ति आनन्दगिरिकृतटीका ॥
तदेवं दृशाहृवाच्यं वचनमुदाहरति दृष्ट्वेति आत्मीयं बन्धुवर्गं युद्धे
च्छया युद्धभूमावुपस्थितमुपलभ्य शोकप्रवृत्तिं दर्शयति सीदन्तीति
देवाशास्यवार्जुनस्यानात्मविदः स्वपरदेहेष्वात्मात्मीयाभिमानवतस्त
त्रियस्य युद्धारम्भे तन्मृत्युप्रसंगदर्शिनः शोको महानासीदित्य
र्थः ॥ २८ ॥

स्वामिकृतटीका ॥

दृष्ट्वेममित्यादियावदध्यायपरिसमाप्ति हेकृष्णभक्तानांक्लेशविले
खनाद्विनाशनात् कृष्णेमंस्वजनंयुयुत्सुं योद्धुमिच्छन्तं युद्धतःस।
मवस्थितेबंधुजनेदृष्ट्वा मदीयानिगात्राणिकरचरणादीनिअंगा
निसीदंतिविशीर्णानिशिथिलान्युत्साहहानिभवंतिविशीर्यन्तइ।
त्यर्थः वचनमुखंपरितःसमंतात् शुष्यति निर्द्रवीभवति ॥ २८

रामानुजभाष्यम् ॥ उपक्रमम् ॥ ॥ ॥

[illegible] ॥ २८ ॥

अभिनवगुप्तकृतटीका ॥ मा २८ क्रि। २८ ॥

परमार्थप्रपा टी॰ ॥

दृष्ट्वेममित्यादि गात्राण्यंगानिकरचरणादीनिसीदंति शिथिलानि
भवंतिमुखंचशुष्कंभवति अथकरुणारसाविर्भावसात्विकानाह २८

वनमाली टी॰ ॥

कृषिर्भूवाचकःशब्दोणश्चनिर्वृतिवाचकः तयोरैक्यं परंब्रह्मकृ
ष्णइत्यभिधीयतेइति ममगात्राणिसीदंतिशीर्यंते २८ ॥

उत्तमवैजयन्तीटीका ॥

दृष्ट्वेममित्यारभ्य यदिमामप्रतीकारमित्यन्तैः सार्द्धाष्टादशभिःश्लो
कैः अर्जुनउवाच दृष्ट्वेममिति हेकृष्णयुयुत्सुंयोद्धुमिच्छुंसमुपस्थि
तंरणभूमौप्राप्तमिमंमयोक्तं निर्दिष्टंस्वजनमात्मबंधुवर्गंदृष्ट्वा।
निरीक्ष्य पश्यतो ममगात्राणिअंगानिहस्तपादादीनिसीदंतिवाय

+तदेवभगवंतंप्रत्यर्जुनवाक्यमवतारयति संजयोऽर्जुनउवाचेत्यादिनाएवंशक्त्योऽर्जुनः संग्रहेस्यतःशक्रनश्येनतत्रस्वधर्मप्रवृत्तिकारिणीभूतनत्वज्ञानप्रतिबंधकःस्वपरदेहेष्वात्मात्मीयाभिमानवतोत्मविदोऽर्जुनस्ययुद्धेस्वपरदेहविनाशप्रसंगदर्शिनःशोकोमहानासीदितितल्लिंगकथनेनदर्शयतित्रिभिःश्लोकैः+

ने मुखंचपरिशुष्यतिमुखंदाहतयाशुष्कंभवतीत्यर्थः २८

मधुसूदनी ॥

+इमंस्वजनमात्मीयंबंधुवर्गंयुद्धेच्छुंयुद्धभूमौचोपस्थितंदृष्ट्वास्थितस्यापश्यतोममेत्यर्थः अंगानिकार्यंतेमुखंचपरिशुष्यतीतिश्रमादिनिमित्तशोषापेक्षयातिशयकथनायसर्वतोभाववाचिपरिशब्दप्रयोगः २८ ॥

सदानंदी ॥

स्वधर्मकरणेहेतुभूतज्ञाननिरोधकृत् महान्शोकोर्जुनस्यासीन्ममाहमितिचेतसा १ इतितल्लिंगतोवक्तिपार्थःकिंसंजयत्रिभिः बंधुवर्गमिमंस्वीयंयुद्धेप्सुंयुद्धभूगतं २ पश्यतोमेस्रथंतेगात्राननंपरिशुष्यति कंपःपुलकितत्वंचगांडीवभ्रंशनंतथा ३ त्वग्दाहोधैर्यदौर्बल्यमंतःसंतापहेतुकाः ४ ॥ २८

नीलकंठी ॥

कथयातेहेत मयमजननमितिविशेषेणावदर्पेने ॥ २८ ॥

सीदंतिनिश्चेष्टानिभवंति रोमहर्षो रोमांचः २८

आनंदी टीका

[illegible] दीनाः
[illegible] विलापवचनयोर्विदितं विषी
[illegible] स्वपरदेहयोरात्मात्मीया
[illegible] नाशशंकया शोकाविष्टोर्जुनऽवा
भिमानवान् स्वपरदेहना
व [illegible] ॥ इत्युति स्पष्टम्

रामकंठी टीका

स्पष्टार्थं २८

लासिकी [illegible]ी टीका

[illegible]
[illegible] ॥ इमं पुरस्तुमौ समुपस्थितं योद्धुकामं बन्धुजनं दृष्ट्वा ममा
[illegible] २८ ॥ मुखं च परितः शुष्कतामेति ॥
गात्राणि सीदन्ति विशीर्यन्ते शिथिलीभवन्ति

रत्नवीरसमिद्धोधिनी॥

एवंव्यवस्थितान्पित्रादीन्विलोक्य परमकरुणाविष्टचेताः स
न् अर्जुनो भगवंतमुक्तवानित्याह तानिति इदं वक्ष्यमाणमब्र
वीदितिसंबंधः विषीदन्निति बंधुहिंसानिमित्तमुपतापं कु
र्वन्नित्यर्थः २८॥

भाषा अनुवाद ॥

उससमय अर्जुनने जो कहा सो संजय कहतेहै कि तब अर्जुन
कृष्णसेबोले कि हे श्रीकृष्ण युद्धकी इच्छा करि संग्राम भूमिमें
खड़े हुये इन स्वजन बन्धुवों को देखि मेरे हाथ पांव ढीले हो
गये और सारी शरीरमे पसीना हो आया मुख भी सूखता जाता
है ॥ २८ ॥

दोहा

परमकृपाकेयुक्त है और विषादसमेत कृष्णप्रतिअर्जुन
तबैकहैंवाक अहदेत २८॥

दृष्ट्वेममित्यादिश्लोकत्रयंस्पष्टार्थम् ॥ २८ ममार्जुनस्यैतादृशीद
शात्वत्कृतस्त्वइतिस्वस्यान्यथात्वापीमेस्वजनाएवेत्येतद्द्वयेकथयु
योगःस्यादितिभावः ॥ २८ ॥

114

वेपथुश्च शरीरे मे रोमहर्षश्च जायते गाण्डीवं स्रं
सते हस्तात् त्वक्चैव परिदह्यते २९ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

अंगेषु तथा मुखे परिशोषश्चेत्युक्तं भयं शोकलिंगमुक्तं सम्प्रति वेप
थुप्रभृतीनि भीतिलिंगान्युपन्यस्यति वेपथुश्चेति रोमहर्षो रो॰
मांचो गात्रेषु पुलकितत्वम् २९ ॥

स्वामिकृतटीका ॥

किंच वेपथुरिति मम शरीरे वेपथुः कंपस्तथा रोमहर्षो रोमांचश्च
जायते गांडीवमिति मम गांडीवं स्रंसते अधः पतति त्वक्चैव परिद
ह्यते आंतरशोकज्वलनेन सर्वतः संतप्यते २९ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

कोमलमनाभवद्विरतिर्घोरे मारणे ॥ २९ ॥ ॥

अभिनवगुप्तकृतटीका ॥ २९ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

सर्वशरीरे वेपथुः कंपो भवति रोमहर्षो रोमांचः अथांगवैकल्यं द
र्शयति गाण्डीवं यत्तद्धस्तात्स्रंसते निपतति त्वक्परिदह्यते संतप्य॰
ते ततः परं कथं योद्धव्यमित्याह ॥ २९ ॥

वनमाली टी॰ ॥ २९ पूर्वश्लोकान्तरे ॥ २९ नास्ति

ऊहमवैजयन्ती टी॰ ॥

किंच मे मम शरीरे वेपथुः कम्पः रोमहर्षः पुलकितत्वं च जायते गाण्डी
वमिति गाण्डीवं स्रंसते धैर्येण गाण्डीवनामधनुर्भ्रंशते च पुनस्त्वक्
परिदह्यते त्वगित्युपलक्षणं बाह्येन्द्रियाणाम् ॥ ॰ २९ ॥

मधुसूदनी ॥

वेपथुः कंपः रोमहर्षः पुलकितत्वं गांडीवभ्रंशेनाधैर्यलक्षणं दौर्ब
ल्यं त्वक्परिदाहेन चांतःसंतापो दर्शितः २९ ॥

सदानंदीटीका ॥ पूर्वश्लोकान्तरे ॥ २९ ॥

॰ त्वगादि सप्तधातूनां वा सर्वाणि बाह्येन्द्रियाणि चर्मादीनि मांसशोणितास्थिमज्जादीनि च समन्ताद्दहन्तु इत्यर्थः ॰

गी॰
टी॰
प्र॰

नीलकंठी टी॰ ॥

सीदंतिनिवेहगात्राणिभक्तंसि रोमहर्षश्चजायते ॥ २९ ॥

115

आनंदी टीका

स्पष्टं २९

रामकंठी टीका

हे कृ[illegible]तन्मे देहे न गात्राणि [illegible]

[illegible]

[illegible] २९ ॥ [illegible] ॥

[illegible] टीका

[illegible]सीदंति विशीर्यंते शोषयि [illegible]

[illegible] २९ ॥ मम शरीरे क

[illegible] चापि [illegible]

[illegible] त्वक्शोकाग्निना सन्तप्यते ॥

[illegible]रोमाञ्चश्च जायते गांडीवं नाम धनुस्तत्स्त्रंसते त्वक्शोकाग्निना सन्तप्यते ॥

रणवीरसमिद्धोधिनी॥

नरेव वचनमुदाहरति दृष्ट्वेति कृषिर्भूवाचकः णश्च नि
र्वृतिवाचकः तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत इति स्मृतेः
सर्वेषामानंदमयत्वं कथं मम हिंसा प्रायेणैव घोरकर्मणि नि
योगेन क्लेशजनको भवसीत्यभिप्रायेण कृष्णेत्यर्जुनेन संबो
ध्यते भगवान् गात्राणीति पदेन करचरणाद्यंगानि स्थितान्यवग
म्यंते तानि च सीदंति शिथिलीभवंति इत्यर्थः २९॥
संधिबंधाल्लक्ष्यंते तानि वसीदंति लिंगत्वे नोक्तो
धात्व प्रोषो प्रोक लिंगत्वे नोक्तो

116

भाषा अनुवाद ॥
और देह कांपती है रोवां खडे हो हो उठते है हाथ मे गाण्डीवध
नुषभी गिरापडता है सर्वांगकी खाल जली सी जाती है ॥ २९

दोहा ॥
बन्धुबांधवकों देषके षडेजो युद्धको हेतस पीडतहोतहैं
अंगममसूखतमुख समेतम २९ ॥

117

नचशक्नोम्यवस्थातुं भ्रमतीवचमेमनः निमित्ता
निचपश्यामि विपरीतानिकेशव ३० ॥

भाष्यंनास्ति आनन्दगिरिकृतटीका ॥

किंचाधैर्यमपि संवृत्तमित्याह नचेति मोहोपि महान् भवतीत्या
ह भ्रमतीवेति विपरीतनिमित्तप्रतीतेरपि मोहोभवतीत्याह
निमित्तानीति तानि विपरीतानि निमित्तानि यानि वामनेत्रस्फु
रणादीनि ३० ॥

स्वामिकृतटीका ॥

चाऽपरंमेमनःकर्तव्याकर्तव्यबोधसाधनमंतःकरणंभ्रमतीवभ्र
मंगच्छतिनिर्द्धारणंकर्तुंस्थातुंचनशक्नोमि निमित्तानीति हेके
शवविपरीतानिअनिष्टसूचकानिनिमित्तानिभयसूचकानिवि
कृतानिशकुनानिपश्यामि ॥ ३० ॥

रामानुजभाष्यम् ॥ उपक्रमम् ॥

॥ ३० ॥

॥ ३० ॥

अंतःसुहृदादिभिरमंगलहेतुतोपि ॥ ३० ॥ नास्ति

अभिनवगुप्तकृतटीका ॥ ३० ॥ नास्ति

परमार्थप्रपा टी० ॥

नचेतिकेवलमवस्थातुंनशक्नोमिकिंतुनयोद्धुं अथमनसिधैर्य
मवलंब्योद्धव्यमितिचेत्तदपिनेत्याह भ्रमतीति मनंकोदिशीकत
यावत्कृतिस्थैर्यंनभवति किंच भोकेशवमानसानिनिमित्तानिभाव
थेसूचकानिइहलोकसाधनानिविपरीतानिअनिष्टहेतूनि ॥ ३०

वनमाली टी० ॥

केशोब्रह्मरुद्रौवाप्ययतिप्रवर्तयतीतिकेशवःकंब्रह्माणमीशं
रुद्रंकामंईशंशंकरंचप्रवर्तयतीतिवा हेकेशव ३० ॥

अहमवैजयन्ती टी० ॥

किंचात्रदेहंस्थापयितुमसमर्थोन्यस्यशुद्धादिकस्यकावर्तेत्याह न
चशक्नोमीति अहमवस्थातुंशरीरंस्थापयितुंचनशक्नोमिसमर्थो
नभवामीत्यनेनसर्वशरीरावयवानांशैथिल्यंसूचितम् ननुबा
ह्येंद्रियाणामन्तःकरणाधीनत्वाद्विचारात्मकेनमनसादेहावस्थाने

४ भवामीत्यर्थः कश्चिद्यः स्वकेशो विधिशिरो पाति ज्ञातो निजभक्तो विनाशय यथा तयोः स्त्रीसंहरणभयं
ध्यानस्य परिहारक त्वमसि तथा ममापि युद्धभावान्मनः कार्यं हरिष्यसि यद्वा केशवरूपं वा निगद
ति यथा वरुणेण ताव पितरं नन्दगोपं नत्वा पूर्वमेव यथा मामपि वन्धुस्नेहपाशात्त्वं मो
यद्वा केशो वै शिना मानमसुरमर्दितवादयु वधितवानिति बुन्दम्या यथा केश्यादिदुष्टदैत्यवधे
भवान्गोकुलादिषु सज्जनानरक्षत तथा मामपि शोकमोहाख्यासुरविनाशेन त्वं रक्षेति केशवेति
संबोधनाभिप्रायः ॥ ४

गी॰ ऊर्विति चेत्तत्राह भ्रमतीवेति मे मम मनो भ्रमतीव विक्षिप्तमुत्कम्प
टी॰ मन इव भ्रमतीत्यर्थः मनसो भ्रमणे कारणमाह निमित्तानीति
प्र॰ यतो विपरीतानि वामाक्षिस्फुरणादीनि निमित्तान्यनिष्टसूचकानि
परिपश्याम्यनुभवाम्यतो हेतोर्मनसश्चलत्वेन शरीरं धारयितुमक्ष
मोऽहं एवं विपरीतनिमित्तदर्शनेन मनसश्चलत्वेन शरीरधारणाक्षम
त्वेनैव हेतुर्विपर्ययेऽवस्थापकत्वं ॥ ३० ॥

मधुसूदनी ॥

अवस्थातुं शरीरं धारयितुं न च शक्नोमीत्यनेन मूर्च्छा सूच्यते तत्र
हेतुः मम मनो भ्रमतीवेति भ्रमणकर्तृत्वमाह यथा मम मनसः कश्चि
द्विकारविशेषो मूर्च्छायाः पूर्वावस्थाया हेतौ यत एवमतो नावस्था
तुं शक्नोमीत्यर्थः पुनरप्यवस्थानासामर्थ्ये कारणमाह निमित्तानि
च सूचकतया सन्नद्धः स्वस्य विपरीतानि वामनेत्रस्फुरणादीनि प
श्याम्यनुभवामि अतोऽपि नावस्थातुं शक्नोमीत्यर्थः अहमनात्मवि
त्त्वेन दुःखित्वाच्छोकनिबंधनक्लेशमनुभवामि त्वं तु सदानंदरूपत्वा
च्छोकासंसर्गीति कृष्णपदेन सूचितम् अतः स्वजनदर्शनेन त्वल्पपि
शोकासंसर्गित्वलक्षणाद्विशेषात्त्वं मामशोकं कुर्विति भावः के
शवपदेन च तत्कारणसामर्थ्यं को ब्रह्मा सृष्टिकर्ता ईशो रुद्रः संह
र्ता तौ वात्यनुकंप्यतया गच्छतीति व्युत्पत्तेः भक्तदुःखकर्षित्वं वा
कृष्णपदेनोक्तम् केशवपदेन च केश्यादिदुष्टदैत्यनिबर्हणेन सर्व
दा भक्तान्पालयसीत्यतो मामपि शोकनिवारणेन पालयिष्यसीति
सूचितम् ३० ॥

सदानंदी ॥

स्वशरीरं न शक्नोमि मनो धारयितुं तथा वामाक्षिस्फुरणादीनि नि
मित्तान्यन्यथान्यथा १ विपरीतं तयोर्दुःखदायीन्यनुभवाम्यहं अहं
नात्मवित्त्वेन दुःखित्वाच्छोकहेतुकं २ क्लेशमनुभवामीति सदा
नंदतया भवान् शोकक्लेशाद्यसंसर्गीत्येव कृष्णेति सूचितं ३ माम
शोकमतः कृष्ण कुरु त्वमिति चाशयः को ब्रह्मा सृष्टिकर्तास्यादी
शः संहारको हरः ४ अनुकंप्यतया तौ द्वौ वाति पाति स केशवः ५
३० ॥

नीलकंठी ॥ पूर्ववत् ॥ ३ ॥

निमित्तानि भूमिकम्पादीनि लोकक्षयकराणि

श्लो आनंदी टीका अवस्थातुं शरीरं धारयितुं न शक्नोमि विपरीतानि निमित्तानि दिव्यान्भोमां [illegible] त्यातान् [illegible] दीन् पश्यामि

[illegible] ३०

रामकंठी टीका

स्पष्टार्थः ३०

लासिकी [illegible] टीका

[illegible] नेकंपः रोमांचः धनुः हस्तात् [illegible]

[illegible] ३० ॥ अहमवस्थातुं शरीरं धारयितुमपि न शक्नोमि मेम नोभ्रमतीव अवसादमिव प्राप्नोति हे केशव निमित्तानि भावि सूचकानि शकुनानि विपरीतानि अनिष्टसूचकानि च पश्यामि उपलभे ॥

रणवीरसमिद्धोयिनी ॥

भीतिविह्वलत्वाद वेपथुरिति ३० ॥

119

रामचन्द्रसरस्वतीकृतटी॰ ॥
निमित्तान्यहितस्पंदादीनि ब्रह्मापतान्सर्वोत्पादयन्नपितवान्तकं
पः ईशोहरोपितानिदानीं संहर्तृत्वात्तकंपपवेतिकेश॰ वेत्य
नेनाह कस्त्वेशास्वकेशीतीवात्पेत्तकंपतयागच्छतीतिकेशवश
हृत्युत्पतेः नतु दुर्योधनादिस्वजनस्त्वेतात्किंयुधिष्ठिरभीमसेना
दिस्वजनः येनेस्वजनंयुयुत्सुमपिहृष्ट्वातवेहशीदशाभवति हृ
तेहृष्ट्वातकिंभविष्यतीतिनविद्मइत्याशंक्यस्वजनमंगीकृत्य त
हृधः प्रयोजनाभावान्नकर्तव्यइत्याह ॥ ३१ ॥

120

भाषा अनुवाद ॥

और मेरे अब खडे होनेकी सामर्थ्य भी नही रही मेरा मन भ्रमता है और निमित्त असगुन उलटे देखताहूं बाई आंख और हाथभी फरकतेहै ॥ ३० ॥

दोहा ॥

कंप अरु रोमांच मोहि प्रगट भए हैं देह छूटत गांडिव हस्त सें त्वचा जरत हैं पुनि ३१ ॥ दोहा नहि सक्त स्थित होयमें भ्रमत ह्यो मेरो चित्त के पावउं लटे देषहों मैं यह होत निमित्त

121

1

नचश्रेयोनुपश्यामि हत्वास्वजनमाहवे नकांक्षे विजयंकृष्ण नचराज्यंसुखानिच ३१ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

युद्धे स्वजनहिंसया फलानुपलम्भादपि तस्मादुपरिरंसाजायतइत्याह नचेति श्रामानो युयुत्सूनो हिंसया विजयो राज्यंसुखानिच लब्धुं शक्यानीति कुतो युद्धादुपरतिरित्याशंक्याह नकांक्षइति ३१

स्वामिकृतटीका ॥

किंचनचेति स्वजनमाहवेयुद्धेहत्वाश्रेयःकल्याणमनुपश्यातदनतरकालेनपश्यामि ॥ ३१ ॥

रामानुजभाष्यम् ॥ उपक्रमम्

परमपुरुषसन्तयोपि हन्तियमानान्मवदीयान् ॥ ३१ ॥ ११

अभिनवगुप्तकृतटीका ॥ ३१ ॥ नास्ति

परमार्थप्रपा ॥

पश्यामिकिंचश्रेयःपरलोकसाधनेननपश्यामि किंचयदर्थमेवाय
२ युद्धप्रसंगस्तदपिनरोचतेत्याह ॥ ३१

वनमाली टी. ॥ ३१ सर्वमेवसमं ॥ ३१ नास्ति

नितनिमित्तदर्शनेनेमनसम्बन्धुलत्वमुक्त्त

उत्तमवैजयन्तीटी. ॥

नचेति चपुनःआहवेयुद्धेस्वजनंबंधुवर्गं हत्वा श्रेयःफलंनानुपश्यामिनानुभवामि द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौपरिव्राड्योगयुक्तश्चरणे चाभिमुखोहतइत्यादिवचनाद्धतस्यैवश्रेयोविशेषकथनेननतुहंतुरतोहननकर्तुर्ममस्वजनवधेनश्रेयइतिभावः ३१ ॥ संभावनान्निष्प्रयोजनंयुद्धादि

मधुसूदनी टी. ॥

श्रेयःपुरुषार्थंदृष्टमदृष्टंवाबहुविचारणादनुपश्चादपिनपश्यामि युद्धेस्वजनमपियुद्धेहत्वाश्रेयोनपश्यामि द्वाविमौपुरुषौलोकेसूर्यमंडलभेदिनौ परिव्राड्योगयुक्तश्चरणेचाभिमुखोहतः इत्यादिना हतस्यैवश्रेयोविशेषाभिधानात् हंतुस्तुनकिंचित्सुकृतमेवमस्वजनवधेपिश्रेयसोभावे स्वजनवधेस्तरांतदभावइतिज्ञापयितुंस्व

संप्रतितत्कारितं विपरीत प्रवृत्तिहेतुभूतं विपरीतबुद्धिंदर्शयति

१ नकांक्षेइति विजयं राज्यलाभं शय्यासनादिभोगात्मकान्यनेकविधानिसुखानिचबहूनिप्रयोजनानिसन्तिनिष्प्रयोजनत्वंयुद्धस्यकथंवदसिइतिवेन्नकांक्षेइति समस्तेजामदग्न्यादिनोचित्तवीर्यभीष्मद्रोणादिकंनिहत्य सचकृतमनस्के सुरासुरैः श्लाघनीयवीर्याद्भवविजयं नकांक्षे नेच्छामि प्रसभ्यकपटोपात्तराज्यात् लोभाय कृतविज्ञानुयोधनादीन्हत्वा तैर्भुक्तंराज्यंच नेच्छामि द्यूतसभादिषु दुरुक्तिउपालम्भनपुत्रादीन्निहत्य नरकवनप्रदस्थितानिदेहेन्द्रियादिजातानिसुखानि नेच्छामिइक्षेतिसम्बोधनेन सदानन्दरूपस्तंप्राकृतभोगस्वरूपेषुविजयादिषु ममाकांक्षांनास्तीतिध्वनितम् १

जनमित्युक्तं एवमनाहववधे श्रेयो नास्तीति सिद्धसाधनवारणा
याहववधमित्युक्तं [न तु मानुषदृष्टप्रयोजनं दृष्टप्रयोजनाभावे तु विज
योराज्यसुखानि च निर्विवादानीत्यत आह] ॥ ३१ ॥

सदानंदी टी॰ ॥

एवंलिंगशरीरेणैव शोकं ज्ञाननिरोधकं उक्त्वेदानीं स्वधर्मेऽपि युद्धे
धर्ममतिं गतः १ आह पार्थो महामोहजन्यायाथ्यामाह तेनावचः विचारे
णापि दृष्टं वाऽदृष्टं श्रेयः कथंचन २ पश्चादपि न पश्यामि हत्वा स्वज
नमाहवे द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ ३ परिव्राड्योग
युक्तश्च रणे चाभिमुखो हतः इति प्रोक्ते हनने सेव श्रेयो हंतुर्न किंच
न ४ मास्तु दृष्टफलं किंचिद्दृष्टं त्वस्ति जयादिकं इत्यत्राह न मे
वांछा जयादौ तत् दृग्गोचरे ५ ॥ ३१ ॥

नीलकंठी ॥

निमित्तानि लोकक्षयकराणि भूमिकंपादीनि ॥ ३१ ॥

आनंदी टीका

भवस्यात्केशवीरंथारावधिके विपरीतानि निमित्तानि दिव्यान्तौ
नेश्रेयोन्यालालीद आहवत्यागेत स्वजनवधाप्रसंगाच्छ्रेयःश्रा
मितिरित्यर्थः ३१ ॥

रामकंठी टीका

स्पष्टार्थम् ३१

लासिकी [illegible] टीका [illegible]

[illegible] न [illegible] एव [illegible] कालिव हे
[illegible] विपरीतानि [illegible] अन्यज्जं
[illegible] कल्याणं श्रेयः पश्चाद्ड नरकाले न च तर्कयामि
[illegible] ३१ ॥ तस्माद्विजयं राज्यं विषयसुखानि च न प्रार्थये

शत्रुबीरस्मसिद्धोयिनी॥

शत्रुबीरसमिद्धोयिनी मोहलिंगं विपरीता
ऐर्यत्यागतत्ल्लाह नवेति भ्रमतीवेति मोहजननेनेति
निनिमित्तानि वामांगस्फुरणादीनि इदमपि मोहजननेनेति इत्याह नवेति
सितं ३१॥ अतश्च गुरुडुउपरि रंसाजायत इत्याह नवेति श्रेयसः
च स्वजनहिंसातोनंतरराज्यसुखादिलब्धिरूपस्यश्रेयस
मवेकिमित्युपरम इत्याह नकांक्षेइति ३२॥

123

रामचंद्रसरस्वतीकृतटीका ॥
नेमेति चः किंचेत्यर्थे स्वस्वजनमितिच्छेदः किंच स्वजनं हत्वा
श्रेयो न पश्यामि यतः द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनो
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हत इति हतस्यैव श्रेयो विशे॰ ॑दासि
षः श्रूयते न हंतुः ननु निहितमस्वजनं हंसि विषवादे श्रेय यदेवं
भाषसे इत्याशंक्याह आहव इति संग्रामहते वैरिणि न हंतुः श्रे
यः उक्तवाक्यादिति भावः ननु माभूच्छ्रेयो विशेषो दृष्टफलानि
त विजयराज्यसुखानि भविष्यतीत्याशंक्याह न कांक्ष इति ह
इष्टफलोपाये प्रवृत्तिरपि तत्फलकामनायां भवति भोजनेच्छा
विरहिणः पाकादावप्रवृत्तेरिति भावः ऊनतस्तदनाकांक्षेत्यत आ
ह ॥३१॥

124

भाषा अनुवाद

मैं कल्याण नही देखताहूं स्वजन बन्धुवोंको संग्राममें मारके हे कृष्ण नही चाहिये हमे विजय और नराज्य और सुखकी भी इच्छा नही है ॥ ३१ ॥

दोहा ॥

नहि देषों कल्याण मे युद्ध में बांधव मार जीत न चाहों कृष्ण में नहि राज्य सुख सार ३ ॥

(३१)

किंनो राज्येन गोविंद किंभोगैर्जीवितेन वा येषा
मर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ३२ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

किमिति राज्यादिकं सर्वाकांक्षितत्वात् नकांक्ष्यसे तेनहि यत्र
भ्रात्रादीनां स्वास्थ्यमाधातुं शक्यमित्याशंक्याह किमिति राज्या
दीनामाक्षेपे हेतुमाह येषामिति ३२ ॥

स्वामिकृतटीका ॥

ननु विजयादिकं श्रेयो वर्तमानं किं न पश्यसीति चेत्तत्राह नकांक्ष
इति हे कृष्णाहं विजयं विशिष्टं जयं संग्रामे उत्कर्षं नकांक्षे नप्रार्थ
ये अहं पुनः राज्यं राज्याधिपत्यं च सुखानि च विजयजन्यान् प्रमोदान्
नप्रार्थये हे गोविन्द नः अस्माकं राज्येन किं भोगैर्विषयसुखैः किं
जीवनेनापि किं गोभिः श्रुतिभिः वेदान्तवाक्यैः विद्यते परमार्थः
रूपेन लभ्यते इति गोविन्दस्तस्यामंत्रणं हे गोविन्द ॥ ३२ ॥

रामानुजभाष्यम् ॥ उपक्रमम् ॥ ३२ ॥ ३२ ॥

विलोक्य विपुलहेतुन परमयाच ॥ ३२ ॥

अभिनवगुप्तकृतटीका ॥ ३२ अं ॥ नास्ति

परमार्थप्रपा ॥

किन्नइनिस्पृहगमं अत्रयुक्तिमाह येषामिति येषामर्थे यन्निमित्तं
यत्नोपार्जनीयराज्यं कांक्षितमभीप्सितं च परं भोगाः सुखानि कांक्षि
तानि ॥ ३२ ॥

वनमालीटी ॥

उक्तं प्रपंचयति द्वाभ्यां गां गंधर्वविद्याः येनु भूमिस्वर्गानूतानरश्मी
नवा विंदति लभति लंभयतीति गोविंद यदर्थे गोभिर्वेदैर्वेद्यतेर
तिवा हे गोविंद यदर्थे अस्माकं राज्यादिकं तप्यते आचार्यादयः आ
णधनादिकं त्यक्त्वा युद्धार्थे स्थिताः अतः किमस्माकं राज्यादिनात न
किमपीत्यर्थः ३२ ॥

अहमेवैजयन्तीटी ॥

[illegible] नतु [illegible] विषाणिः सुखैर्दिव्य [illegible] भिः प्राप्यं
नतु [illegible] निवृत्तिः [illegible] नतु [illegible] किन्नो राज्येने
[illegible] पश्यसीति [illegible] तत्राह
[illegible] मानेषु विजयादिषु तदिच्छा उतो न जायते

उ

[illegible]

गाभिरिन्द्रियगणं विन्द्रत्यनूरात्मस्वरूपेण प्राप्नोतीति व्युत्पत्त्या यथावत् सर्वदा सर्वेन्द्रियप्रवृत्त्यादि जानासि तथा ममाप्ययमाग्रहस्त्वं न तं जानासीति गोविन्देति संबोधनाभिप्रायः राज्यादीनां निर्वेदहेतुमाह येषामिति येषां स्वबन्धुवर्गाणामर्थे पालनार्थे नोऽस्माकं राज्यं कांक्षितमपेक्षितं भोगाः सुखानि चापेक्षितानि ॥

गी. टी. प्र. ति बंधुविरहितेन राज्येन किं शारीरेन्द्रियविषयसुखरूपैर्भोगैर्वा किं जीवितसाधनरूपेण विजयेन वा किम् न वाञ्छितानां नोऽस्माकमतिनुच्छैरभिर्न किमपीत्यर्थः ॥ ३२ ॥

मधुसूदनी ॥ ननु माऽभूदस्ट(?)प्रयोजनं नि[...]तविजयोऽर

निर्विवादानीत्यतआह ॥ फलाकांक्षा ह्युपायप्रवृत्तौ कारणं अतस्तदाकांक्षायाः अभावान्नउपायेयुद्धे भोजनेच्छाविरहिण इव पाकादौ मम प्रवृत्तिरनुपपन्नेत्यर्थः कुतः पुनरितरपुरुषैरिष्यमाणेषु तेषु न वाञ्छेत्यत आह किंन इति भोगैः सुखैर्जीवितेन जीवितसाधनेन विजयेनेत्यर्थः विनाराज्यं भोगानकौरवविजयं च वने निवसतामस्माकं तेनैव जगति श्लाघनीयजीवितानां किमेभिरकांक्षितैरिति भावः गोशब्दवाच्यानीन्द्रियाण्यधिष्ठानतया नित्यं प्राप्तस्त्वमेव ममैहिकफलविरागं जानासीति हृदयं संबोधयति गोविंदेति राज्यादीनामाक्षेपहेतुमाह ॥ ३२ ॥

सदानंदी टी. ॥

राज्यादिभिर्न चास्माकमीषदपि प्रयोजनं त्वमिंद्रियाण्यधिष्ठानतया प्राप्तोसि सर्वदा १ फले रागं विरागं च जानासीत्येवंरूपं वचनं गोविंदेत्याह राज्यादेराक्षेपे हेतुमाह च २ एकाकिनो न राज्यं येषां तेन तदपाहितं एषामर्थे न पतेयं प्राणांश्च धनेषणं ३ त्यक्त्वाचार्यादयो युद्धेऽस्मन्नवस्थितास्त्वयास्थिताः ते सर्वे संगरे यर्हि हत्वाऽऽचार्यकादयः ४ किं नः स्यात्तर्हि राज्यादिभोगैः पापकैरेहैः ५ ॥ ३२ ॥

नीलकंठी ॥

पूर्वश्लोकान्तरे ३२ ॥

128

आनंदी टीका

अथ हेतुमाह [illegible] २२ येषामिति येषां बान्धवानामर्थे

रामकंदी टीका

सुगमोर्थः २२

लासिकी [illegible] टीका ॥

[illegible] गोभिर्वेदांतवाक्यैः परमात्मरूपेण
[illegible]
विषयेलभ्यतइतिगोविंद [illegible]
[illegible] किंभोगैः किंजीवि
[illegible] नोस्माकं राज्येन किं भोगैः जीवितेन वा २२ ॥ येषां बन्धूनां हेतो
[illegible] अथ हेतुमाह त्याभ्या
नेन किं न किंचित्फलमित्यर्थः नोस्माकं कांक्षितं दाङ्क्षितम्
राज्यं भोगा विषया: सुखानि विषयोपभोगजन्या हर्षा

रणवीरसमिद्धोधिनी ॥

अथ हेतुमाह किंनइति कुतोनराज्याद्यपेक्षेत्याह येषामिति
२२ ॥

127

किंनइति जीवितेनवाहो विजयीजीवतीतिकार्यकारणभावाद्वि
जयंलक्षयति विनाराज्येविनाभोगान्विनाकौरवविजयेवनेनि
वसतामिव जगतिश्लाघनीयजीवितानोनःपांडवानांकिमेभि
राकांक्षितैरितिभावः इंद्रियाणिगोशब्दवाच्यानिअधिष्ठानतया
नित्यप्राप्त स्त्वमेवास्माकमैहिकफलविरागंजानासीतिसंबोधन
व्याजेनाह गोविंदेति ननुस्वस्यविरक्ततायामपिस्वीयानामर्थेय
तितव्यमित्याशंक्याह येषामिति किंतयानरक्षाहूलविदेशगत
याश्रिया स्रवयो यांनपश्यंतिबंधुभिर्यानभुज्यते इत्युक्तेयें
धामर्थे स्वामिरे तत्फलमाकांक्षणीयं न पते प्राणप्रणं धनाप्रणं च त्यक्त्वा युद्धेऽव
स्थिता इति न स्वीयार्थोप्यपेक्ष्यत इतिभावः ३२

तइमेवस्थितायुद्धे प्राणांस्त्यक्त्वाधनानिच आ॰
चार्याःपितरःपुत्रा स्तथैवचपितामहाः ३३ ॥

भाष्यंनास्ति आनंदगिरिकृतटीका ॥

तानेव विशिनष्टि आचार्या इति ॥ ३३ ॥ ३३ ॥

स्वामिकृतटीका ॥

येषामिति येषांस्वजनानामर्थेप्रयोजनायनोस्माकंराज्यंभोगाश्च
पुनःसुखानिच तइमेयुद्धनिमित्तेप्राणान्प्रातरधनानित्यक्त्वा
विहायधनानिबाह्यप्राणांस्त्यक्त्वावस्थिताः अतःकिमस्माकंराज्यादि
भिःकृतमित्यर्थः ॥ ३३

रामानुजभाष्यम् ॥ उपक्रमम् ॥

३३ ॥

[illegible] ॥

अभिनवगुप्तकृतटीका ॥ ३३ ॥ नास्ति

परमार्थप्रपा ॥

तइमेअत्रयुद्धेधनानिविषयभोगोपकरणानिस्त्रीपुत्रादीनिप्राणां॰
श्चत्यक्त्वाअवस्थिताःसंतितेषुहतेषुराज्यंकेनभोक्तव्यं केवलेस्व
पिंडपोषणैकफलमित्यर्थः ॥ ३३ ॥

वनमाली टी॰ ॥ पूर्वश्लोकांतरे ॥ ३३ ॥

उत्तमवैजयन्ती टी॰ ॥

राज्यादीनांनिर्वेदबीजमाह येषामिति येषांस्वबंधुवर्गाणाम॰
[illegible]नोस्माकंराज्यंकांक्षितं[illegible]भोगाः[illegible]ताःअ
[illegible]पेक्षितानि इमेमत्रेत्रगोचरवर्तिनःस्वेपवंधवःप्राणान्
जीविताशांधनानिचधनाशांचत्यक्त्वापरित्यज्ययुद्धेस्थिताःइत्या
त्मनआत्मीयानांचस्वत्वाद्यभावत्वात्निष्प्रयोजनंविजयादिक
मितिभावः ३३ ॥

येषामर्थेयुष्माकंराज्यभोगादिकमपेक्षितंतेनकृत्याकांदायां नानाचार्याद्याइतिसहाथायम्

मधुसूदनी टी॰ ॥

कि॰ एतेनस्वस्यवैराग्येपिस्वीयानामर्थेयतनीयमित्यपास्तं एकाकि
नोहिराज्याद्यनपेक्षितमेवयेषांतुबंधूनामर्थेतदपेक्षितंते एतेते
प्राणान्प्राणाशांधनानिधनाशांचत्यक्त्वायुद्धेवस्थिताइतिनस्वा
र्थःस्वीयार्थोवाप्रयत्नइतिभावः भोगाश्चाद्यः पूर्वत्रसुखोपरतया

गी॰ निर्दिष्टोप्यत्रपृथक् स्वत्वग्रहणंतु दुःखसाधनविषयपरः प्राण
टी॰ धनप्राप्तौतु तदाशालक्षकोमप्राणत्यागेपिस्वबंधूनामुपभोगा
प्र॰ धनाशासंभवेदितितद्वारणायपृथग्धनग्रहणं २२ ॥

सदानंदी टी॰ ॥

पूर्वश्लोकांतरे २२ ॥

129 नीलकंठी ॥ टी॰ २२ ॥

वात्यवानेव आह आचार्येति

आनंदी टीका, [illegible]

देवं वा थवानामर्थे ३३ [illegible]

रामकंठी टीका

स्पष्टम् ३३

लासिकी [illegible] टीका

देवं वा थवा नामर्थे [illegible] वाक्यवानेवाह [illegible]

[illegible] सत्वान्

[illegible] देवविषयाः [illegible] सर्वेस्वभूतान्

[illegible] नियनानि [illegible] नानि सर्वस्वभूतान्

[illegible] वयवः प्राणभूतानियनानि [illegible] अथवा प्राणान् प्र

[illegible] णान् अथवा धनानि सर्वस्वभूतान् प्राणान् अथवा प्राणान् प्र

णान् अथवा धनानि सर्वस्वभूतान्प्राणान् अथवा प्राणान् विशि

[illegible] उपलक्षणे देवाः स्थिताः तान्बन्धून्विशि [illegible] ३३

स्वनयनानि ग्रथीस्पक्का [illegible] इत्यादिना [illegible]

नहि आचार्या इत्यादिना

भगवीरसमिद्धोधिनी॥

आचार्या इत्यादि ३ ॥

केनइत्यपेक्षायामाह आचार्या इत्यादि

22

130

रामचंद्रसरस्वतीकृतटीका ॥

इत्युक्ते देवानमर्थैस्माभिरेनत्फलमाकांक्षणीयं न पदैश्चालाशा
धनाशांत्यक्त्वाकाशुद्धेः वाक्यमिताइति नमीमांसयोऽयं पद्यावनरति
भावः प्राणाशायांत्यक्त्वा यो सर्वत्यागात् पुनर्धनग्रहणं प्राणेभ्या
पिधनस्यापेक्षणीयताघातनार्थं प्राणधनशब्दाभ्यां तदाशेलः
त्तणीये भोगशब्दो विषयपरः केते इत्यपेक्षितेऽनन्तरश्लोकः सच
स्पष्टः ॥ ४३ ॥

131

भाषा अनुवाद

क्या करनाहै हमे राज्य लेकर हेगोविंद और भोगसे क्याहै औ
र जीनेसे भी हमे क्या प्रयोजनहै कि जिनके वास्ते हम राज्य
भोग सुखकी आकांक्षा करतेहै वेई पाण्डव प्राण धन छोड
मैरसामने संग्राममे खडेहै और आचार्य पितृ पितामह पुत्र
पौत्रही सकल देख खडेहै ॥ ३२ ३३ ॥

दोहा

राज्यभोगजीवत भए का हमरो गोविंद जिन्हलग चाहें हें
हमे राज्यभोगसुखसंग ३३ ॥

13

मातुलाः श्वशुराः पौत्राः स्यालाः संबंधिनस्तथा ।
एतान्न हंतुमिच्छामि घ्नतोपि मधुसूदन ३४ ॥

भाष्यं नास्ति आनन्दगिरिकृतटीका ॥

मातुलाइति स्याला भार्याणां भ्रातरो धृष्टद्युम्नप्रभृतयः वध्येषु
पि स्वराज्यपरिपन्थिघातनायिष्टकपाण्डु आत्मवधमानु युद्धात् ।
पूर्वोक्तमोहादिवशात् प्रवृत्तिं प्रदर्शयति एतानिति जिघांस
न्तं जिघांसीयादिति न्यायादेतेषां हिंसा न दोषायेत्याशंक्याह
घ्नतोपीति ३४ ॥ स्वामिकृतटीका

आचार्यादयो यथाव्याख्याताः पितरः पुत्रास्तथा पितामहा मातु
लाः श्वशुराः पौत्राः स्यालाः पत्न्या भ्रातरः संबंधिनो विवाहादिसं
बंधवंतः ननु यदि कृपया त्वमेतान्न हंसि तर्हि त्वामेते राज्य
लोभेन हनिष्यंति अतस्त्वमेवैतान् हत्वा राज्यं भुंक्ष्वेति तत्राह ॥ ए
तानिति सार्धेन हे मधुसूदन एतान् आचार्यादीन् घ्नतोपि मार ।
यतोपि ॥ ३४ ॥ रामानुजभाष्यम् ॥ उपक्रमं ॥ ३४ ॥
अभिनवगुप्तकृतटीका ॥ ३४ नास्ति
उपक्रमं ॥
परमार्थप्रपा ॥

ननु वयं गोत्रतावात्सल्येन यद्यपि युद्धादुपरतास्तथापि ते अस्मान्
निहंत्येवेत्याशंक्याह एतानिति ॥ ३४ ॥
वनमाली॰ टी॰ उपक्रमं ३४ ॥
कुसुमवैजयन्ती टी॰ ॥
[illegible] स्पष्टार्थमपर्यम् ॥ ३४ ॥
नन्वाचार्यादिहितैते त्वनागता इत्याशंक्याह तान् मधुसूदनी ॥ विभिन्नमिति ^
आचार्याः द्रोणादयः पितरः स्वगोत्रजाः पुत्रा द्रौपद्यां जाताः स्वकीया
अभिमन्युप्रभृतयो वा पितामहा भीष्मादयः मातुलाः शल्यशकुनिप्रभृ
तयः श्वशुरा द्रुपदादयाः पौत्राः लक्ष्मणादिपुत्राः स्याला धृष्टद्युम्नादयः
संबंधिनो विवाहादिसंबंधप्राप्ताः तथा परे वः स्वसेना परसेनास्थि

बह

गी॰
टी॰
प्र॰

तायोद्धारः उभयोःसेनयोर्मध्येमदीयाएवअतोनयोत्स्यामीतिभा
वः ३५ ॥ सदानंदी टी॰ ॥
ननुत्वंकृपयाविष्टोयदिनाम हनिष्यसि राज्यलोभाद्धनिष्यंतित्वा
मेतइतिचेच्छृणु १ त्रैलोक्यराज्यसंसिद्ध्यैनैतानहं हंतुमतोप्यहं क
र्यामिच्छामपिस्वीयान्किंतुहन्यांमहीकृते २ मधुसूदनवेदाद्युसं
प्रदायप्रवर्तक मामपिप्रेरयश्रौतमार्गेमोक्षप्रदेशुभे ३ विनि
वर्त्याशुभान्मार्गादितिभावोऽर्जुनस्यच ४ ॥ ३५ ॥
नीलकंठी ॥
स्यालाइतिस्यालशब्दोदंत्यादिः विजामातुरुतवाघास्यालादिति
मंत्रवर्णात् स्याल्लाजानावपतीतिवालाजालाजतेःस्यंशूर्पंस्यते
रितियास्कः ३५ ॥

133

आनंदी टीका

यदित्वंकृपयैतान्नहंसि तर्हित्वामेवैतेहनिष्यन्ति तत्वमेवैता
न्हत्वाराज्यंभुंक्ष्वेत्याशंक्याह ३४ ॥

रामकंठी टीका

स्पष्टम् ३५

लातिकी [illegible] टीका

सम्बन्धिनोविवाहादिसंबन्धयुक्ताः अतएव॥ ३५ एतानाचार्या
दीन्घ्नतोपि मारयतोपि

रत्नवीरसमिद्धे

एतानाचार्यादीन् एतेनस्वधर्मप्रच्युतिर्मोहादिफलंदर्शितं
ननुजिघांसंतंजिघांसीतेति नियमादजिघांसतः किंप्रदर्शं
नेच्छामीतिनेत्याह अतोपीति ३ ॥

134

रामचंद्रसरस्वतीकृतटीका ॥

ननुकुलक्रमायातापृथ्वीतावत्पुत्राद्यर्थंसाधनीयामास्तुभवतो
भोगादीच्छुत्वाशंक्याह एतानिति घ्नतोपि एतान्भ्रातॄन्हंतुमिच्छामिमधुः
हेनकुर्यांकिमुतहन्त्वा नहिपुत्राणामिंद्रादिपदाभिलाषेणापि
भ्रातरोहंतव्याः किमुमहीभिलाषेणत्वमपिपुत्रहितायमामेवहिंसि
तवानसिनेंद्रमितिसंबोधनव्याजेनोक्तं ॥ ३४ ॥

135

भाषा अनुवाद ॥

जो कहो कि कृपा करिके चाहो तुम इन्हे छोडो परवे सब सेना
मेमें अब तुझे मारे होंगे बिनमारे किसी तरह न छोडेंगे इससे
तुम इन सबको संहार करि राज्यभोग क्यों न करो तो हे मधुसूदन
ये लोग चाहे हमें मारें परन्तु मारते हुयेभी मामा नाती पोते
भतीजे ससुरे संबन्धी इनको हम मारनेकी इच्छा नही करते
है ॥ ३५ ॥

दोहा ॥

सोयह स्थित हैं युद्धमे त्याग द्रव्य अरु प्राण पितृ पुत्र हित गु
रु सम पितामह त्यों जान ३४ ॥ मामा ससुर साला तथा
पौत्र साक संबंध इनको नहि मारा चहों प्राण अंत गोविंद ॥

136

अपित्रैलोक्यराज्यस्य हेतोःकिन्नुमहीकृते नि
हत्यधार्तराष्ट्रान्नः काप्रीतिःस्याज्जनार्दन ३५।

भाष्यंनास्ति
आनन्दगिरिकृतटीका ॥

पृथिवीप्राप्त्यर्थेहि हननमेतेषामिष्यते नच तत्प्राप्तिः समीहिते
ति कैमुतिकन्यायेनदर्शयति अपीति नहिमहदपि त्रैलोक्यलक्ष
णं राज्यंलब्धुं स्वजनहिंसायै मनोमदीयं स्पृहयति पृथिवीमा
त्रार्थं पुनर्बन्धून अहंहन्यामीति किंवक्तव्यमित्यर्थः दुर्योधना
दीनां शत्रूणां निग्रहे प्रीतिप्राप्तिसम्भवाद्युद्धं कर्तव्यमित्याशं
क्याह निहत्येति ३५ ॥

स्वामिकृतटीका ॥

त्रैलोक्यराज्यस्यापि हेतोःप्राप्त्यर्थंहंतुंनेच्छामिकिंपुनर्महीमा
त्रप्राप्त्यर्थमित्यर्थः निहत्येति हेजनार्दन जनान्देवविपक्षभू
तानसुरादीन्अर्दयतिपीडयति अथवा जनैरर्थिकारिपुरुषै
रभ्युदयादिकमर्थ्यते प्रार्थ्यतेस्मादितिजनार्दनः हेजनार्दन धार्त
राष्ट्रान्निहत्यनः अस्माकंकाप्रीतिः किंस्वर्गस्यात् नकिमपीति
॥ ३५ ॥

रामानुजभाष्यम् उपक्रमे ॥ ३५ ॥

अभिनवगुप्तकृतटीका ॥ ३५ ॥ नास्ति

परमार्थप्रपा ॥

त्रैलोक्यराज्यस्यापि हेतोः एतान्हन्तुंनेच्छामि किंपुनर्महीकृ
ते किंभूतानेतान् घ्नतोपि मारयतोपि स्वात्मानंहंतुंप्रहर्तृनाअपि
तेन हन्तव्या इत्यर्थः यथादेववशात्प्राणघातायोपस्थितस्यापि तिय
र्यग्भावंप्राप्तस्यगर्भकस्यहजनने मातानपतते तद्वदस्मद्वैवनो
दितास्तेयात्किंविस्तरेण तथापि वयंतान्हंतुंनार्हाः ॥ ३५ ॥

वनमालीटी० ॥

त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमपि हंतुं नेच्छामि किंपुन
र्महीमात्रप्राप्तयइत्यर्थः मधुसूदयतीति मधुसूदनः जनानर्द
यतिनिर्गमयतिजीवान्सदसत्कृती तिजनार्दनः काप्रीतिः।
किंस्वर्गं ३५ ॥

137

उत्कर्षमेवजयन्ती टी॰॥

ननु करुणं हित्वैतान् शीघ्रं त्वं मारय नो चेदकारुण्यतेस करुणं त्वां मारयिष्यन्त्येवेति चेत्तत्राह एतानिति एतान् घ्नतोपि अस्मान् घ्नतो यतोप्यहं त्रैलोक्यराज्यस्यापि हेतोः त्रिभुवनराज्यप्राप्त्यर्थमपि

कामी तान्बंधुवर्गान् हन्तुं नेच्छामपि न करोमि महीकृते महीमात्रस्य प्राप्तये तु किमुत वक्तव्यमिति भावः मधुसूदन मधुनामानमसुरं सूदयति पूर्वं यथा वेदापहारिणमसुरं हत्वा सद्धर्मप्रवर्तकस्त्वमासीस्तथेदानीमपि ममबंधुवधेच्छात्मकं महान्तमसुरं निहत्यैवस्वेनरूपं सद्धर्मं प्रवर्तयेति सम्बोधनकथनस्याभिप्रा-

ना॰ यः ननु इतराचार्यादीन्विहाय युष्माकमतिदुःखदान् नाततायिनो बहूपकर्तॄन्केवलं दुर्योधनादीनेव त्वं मारयैषां वधे तव भवतो सुखमेव भविष्यतीति चेत्तत्राह निहत्येति धार्तराष्ट्रान् जरायुत्तस्य नेत्रहीनस्य राज्यलुब्धस्य धृतराष्ट्रस्य पुत्रान्निहत्यास्थितानां नोस्माकं का प्रीतिः स्यान्न कापीत्यर्थः ॥ ३५ ॥

मधुसूदनी ॥

ननु यदि कृपया त्वमेतान् हंसि तर्हि त्वामेते राज्यलोभेन हनिष्यन्त्येव अतस्त्वमेवैतान् हत्वा राज्यं भुंक्ष्वेत्यत आह

त्रैलोक्यराज्यस्यापि हेतोस्तत्प्राप्त्यर्थमपि अस्मान् घ्नतोप्येतान्नहं हन्तुमिच्छामि इच्छामपि न कुर्यामहं किं पुनर्हन्यां महीमात्रप्राप्तये तु न हन्यामिति किमु वक्तव्यमित्यर्थः मधुसूदनेति संबोधयन् वैदिकमार्गप्रवर्तकत्वं भगवतः सूचयति नन्वन्यान्विहाय यथा

ग धार्तराष्ट्रा एव हन्तव्यास्तेषामत्यन्तक्रूरतरत्वेन दुःखदातॄणां वधे प्रीतिसंभवादित्यत आह धार्तराष्ट्रान्दुर्योधनादीन् भ्रातॄन्निहत्यास्थितानां

म नोस्माकं का प्रीतिः स्यान्न कापीत्यर्थः नहि मूढजनोचितक्षणमात्रवर्तिसुखाभासलोभेन चिरतरनरकयातनाहेतुर्बंधुवधोस्माकं युक्त इति भावः ॥ ३५

[redacted] ॥ सदानंदी टी॥

नन्वन्यान्संपरित्यज्य दुर्योधनमुखा बलाः हन्तव्याः क्रूरनाशी स्यात्प्रीतिरित्यत आह सः १ दुर्योधनमुखान्भ्रातॄन्निहत्यास्माकमीदृशान् न कापि प्रीतिराभाति हिंसा क्वापि नो वरा २ क्षणिकानंदलोभेन नैतेषां युक्तो वधः यदि वध्यास्त्वया तर्हि हन्तव्याः खलनाशिना ३ प्रलये सर्वसंहारकर्तृत्वेनाप्यसंगिना जनार्दनपदेनेति

आनंदी टीका

आचार्यादिष्वपि तावत्कृपा नहिं तान्परित्यज्यतनायिनोधा। नेराष्ट्रं जहिहि इत्याशंक्याह ३५ ॥ 'निहत्येति

रामकंठी टीका

स्पष्टम् ३५

लालसिकी [illegible] टीका

आचार्यादीन्स्मारयतोपि त्रैलोक्यराज्यप्राप्त्यर्थमपि नेच्छामि। किंहत्वेस्यात् किं पुनर्वक्तव्यं महीमात्रप्राप्तये हंतुमिच्छामि किं हत्वेस्यात् नकिमपि ३५ ॥

हे जनार्दन धार्तराष्ट्र हत्य नो अस्माकं

रणवीररसमिद्धोयिनी॥

एरत्थें चैते हन्यंते तस्यामस्याः प्राणिरपि न समीहितेतिकैमु त्येनाह अपीति त्रैलोक्यराज्यमपिलब्धुं नवंधू जिघांसामि किमुतमहीमात्रंप्राप्तुमितिहेतुकथनं अतामप्यहननेइति नतुप्रीतिमात्रमेवप्रयोजकंभवतित्याशंक्याह निहत्येति ३६

138

ह्रविंतेह्रल्मबुद्धिना ध ॥ ३५ ॥

नीलकंठी ॥ टी ॥

हेतेइच्छापिममनभवति किंस्रतहेंत्न्वमित्यर्थः महीकृतेष्ट
थिवर्थे ३५ ॥

139

रामचंद्रसरस्वतीकृतटी॰ ॥
किंचपुत्रादीनांपृथिवीभवतितिभ्रात्रर्ष्ठहंतेषुस्वीयंनकिंचित्प्रयो
जनंपश्यामीत्याह निहत्येति नसमस्यस्मत्ववायान्येनाकरणीयंक
रणीयमितिभावः नचवयंहंतमप्येतान्विनासंहर्तस्तवेच्छा प्रभवामइ
त्याशयेनाह जनार्दनेति ॥ ३५ ॥

140

भाषा अनुवाद

जोकहो कि हाथ कारिके चाहो [illegible] छोडो परन्तु सब संग्राम
में सब [illegible] बिनमारे किसी तरह न छोडेंगे इससे हम
[illegible] कौन न कर्म मोहे [illegible]
इन सबको [illegible] मारने कहे भी ॥ जिनको हम
ये लोग चाहें हमें मारें परन्तु मारनेकी इच्छा नही रख
तीन लोककी राज्य संपदा के वास्ते भी मारनेकी इच्छा नहीं रख
ते तो हे जनार्दन केवल पृथिवी भरकी राज्यके हेतु दुर्योधन
आदिको नाश करिके हमारी क्याप्रीति अर्थात् कौन बड़ा कार्य
सिद्ध होगा तात्पर्य यह कि कुटुम्ब को नाश करि हमको संसार
का सुख नहीहै ३५ ॥

दोहा

मिलें राज्य त्रैलोककी भूमिहेतका बात हम मारकहून द
मेका प्रातिसरसात ॥ ३ ॥

३६

पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः तस्मा
न्नार्हा वयं हन्तुं धार्तराष्ट्रान्स्वबांधवान् स्वजनं हि
कथं हत्वा सुखिनः स्याम माधव ३७ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

यदि पुनरमी दुर्योधनादयो न निगृह्येरन् भवन्तस्तर्हि तैर्निगृ
हीता दुःखिताः स्युरित्याशंक्याह पापमेवेति यदीमे दुर्योधना
दयो निर्दोषानेवास्मान् युद्धभूमौ हन्युस्तदैतानग्निदो गरदश्चेत्या
दिलक्षणोपेतानाततायिनो निर्दोषस्वजनहिंसाप्रयुक्तं पापं
पूर्वमेव पापिनः समाश्रयेदित्यर्थः अथवा यद्यप्येते भवन्त्यात
तायिनस्तथाप्येताननतिशोच्यान् दुर्योधनादीन् हिंसित्वा तत्कृ
तं पापमस्मानेवाश्रयेदतो नास्माभिरेते हन्तव्या इत्यर्थः अथ
वा गुरुभ्रातृसुहृत्प्रभृतीनेतान् हत्वा वयमाततायिनः स्यामः
ततश्चैतान् हत्वा तत्कृतं पापमाततायिनोऽस्मानेव समाश्र
येदिति युद्धादुपरमणमस्माकं श्रेयस्करमित्यर्थः फलाभावा
दनर्थसम्भवाच्च परहिंसा न कर्तव्येत्युपसंहरति तस्मादिति ।
किंच राज्यसुखेप्सुभिरपि युद्धमुपक्रम्य तेन च स्वजनपरिक्षये
सुखमुपपद्यते तेन न कर्तव्यं युद्धमित्याह स्वजनं हीति ३७ ॥

स्वामिकृतटीका ॥

ननु च अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव ष
डेते ह्याततायिन इति स्मरणादग्निदत्वादिभिरपि षड्भिरपि हेतुभिरे
ते तावदाततायिनः आततायिनामघांच वधो विहितत्वाद्युक्त एव
आततायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हंत
भवति कश्चनेति वचनात् तत्राह सार्धेन पापमिति आततायिन
मायान्तमित्यादिकमर्थशास्त्रं धर्मशास्त्रं दुर्बलं यतः अर्थशास्त्रात्तु याज्ञवल्के
नेति स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थशास्त्राच्च
बलवद्धर्मशास्त्रमिति स्मृतेः तस्मादाततायिनामप्येतेषामाचा
र्यादीनां वधेऽस्माकं पापमेव भवेत् अन्यायत्वादधर्मत्वाच्चैतद्वधस्य
इत्येतामाशंकां धर्मशास्त्रस्यार्थशास्त्राद्बलवत्त्वेन परिहरति पाप
मिति न केवलमिह लोके सुखं नास्ति परलोकेऽपि तन्नास्ति यस्मा
देतानाततायिनो हत्वास्मान्पापमेव नरकादिदुःखकारणमा

गी.
टी.
प्र.

श्रयेत् ३६ यस्मादेतेषां हनने लोकद्वयेप्यकल्याणमेव तस्मात्स्वबां-
न्स्वबांधवान्धार्तराष्ट्रान् हंतुं वयं नार्हा न एतेषामन्यायत्वात् अथ वधस्य
मत्वाच्च न केवलमस्माकं पारलौकिकं सुखं न भवति ऐहिकमपि न
भवतीत्याह स्वजनमिति हे माधव हि यस्मात्स्वजनं हत्वा वयं
सुखिनः कथं स्याम ३७ ॥

रामानुजभाष्यम् ॥ उपक्रमे ॥ ३७ ॥

अभिनवगुप्तकृतटीका ॥

अमी आचार्यादय इति विशेषबुद्ध्या बुद्धावारोप्यमाणं वधकर्म
तयाऽवश्यं पापप्रदायिनः तथा भोगसुखादिदृष्टार्थमेतद्युद्धं क्रि
यत इति बुद्ध्या क्रियमाणे युद्धे वधहननादि तदवश्यं पातक
कारीति पूर्वपक्षाभिप्रायः अत एव स्वधर्ममात्रतयैव कर्माण्यनु
तिष्ठन् विशेषधियेत्युत्तरं दास्यते निहत्यधार्तेति आततायिनो
हनने पापमेव कर्तृ अतोऽयमर्थः पापेन तावदेते सम्यक्त्वेवाहताः
ता परतंत्रीकृतास्तांश्च निहत्यास्मानप्याश्रयेत् पापमत्र लोभव-
शात्कुलक्षयादिदोषादर्शनम् अत एव कुलादिधर्माणामुपदे
शं करोति स्वजनं हि कथमित्यादिना ॥ विशेषफलबुद्ध्याहंतव्या
दिविशेषबुद्ध्या च हननं महापातकमित्यनेन देवसंवित्याभिधा
तुम् ॥ ३७ ॥

परमार्थप्रपा टी. ॥

तदुक्तं उत्क्षेपणं गर्भगतस्य पादयोः किं कल्पते मातुरधोक्षजाग
स इति अथास्मान् तत्कृपया सकृद्युद्धे समस्तेन कथं हनिष्यंती-
त्याह आततायिन इति अपराधराहित्येऽपि परं हंतृन् अत्र स्मृतिः
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आ
ततायिनः इति आततायिनमायान्तं हन्यादेवाविचारयन् इत्याद्य
पि स्मृत्युक्तमस्तीति चेन्न इदं चौरादिषु दृष्टेषु राजनीतौ प्रोक्तं न पुत्र
वि. पौत्रादिष्विति ॥ ३७ ॥

वनमाली टी. ॥

नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ता च षडेते
ह्याततायिनः आततायिनमायान्तं हन्यादेवाविचारयन् नाततायि
वधे दोषो हंतुर्भवति कश्चनेत्युक्तात् आततायिलक्षणयुक्तान् जहीत्यत
आह पापमिति आततायिवधबोधकशास्त्रं अर्थशास्त्रत्वेन अहिंसा
परमो धर्म इत्यादि धर्मशास्त्रतो दुर्बलत्वेन बाधितत्वात् आततायिनो
ऽहणं तत्संबंधिनामाचार्याणां वधोऽस्माकमिष्टः किं तु पापमेव

कामीतितिसुकं स्पष्टयति स्वजनं हीति मायालक्ष्म्या धवः पतिर्माधवः श्रीमानी ता प्रतिबंधरतिववना मा न विद्यते पतिर्यस्य स माधवः मायो तातधर्मो वहति वर्तयतीति वा

भवेत् ३६ ॥

ऊरुमवैजयन्ती टी॰ ॥

नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आततायिन इति आततायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेति वचनात्सर्वप्रकारेणाततायिनामेषां वधे दोषाभावात्कथमेते न हन्तव्या तत्राह पापमेवेति आततायिनोऽपि [illegible] तानुद्वर्योधनादीन् हत्वा स्थितानस्मान् पापमेवाश्रयेन्ना [illegible] कामीतिः श्रुयात् हे जनार्दन [illegible] मनति [illegible] मीतिः स्यात् [illegible] पापम् [illegible] बाधितत्वम् ॥ पूर्वोक्तवच [illegible] पापमेवेति [illegible] वि[illegible] नेत्बन्धुवर्गातिरिक्ताततायिविषयमिति भावः तस्मादिति यस्मादेतेषां वधे श्रेयसोऽभावस्तस्मात्संबोधवानेतानाततायिनोऽपि धार्तराष्ट्रान् हन्तुं वयं नार्हा [illegible] न योग्या भवामः ह्रियस्मात्स्वजनं हत्वा खलु बच्छरणा का वयं कथं सुखिनः स्याम भवेम न कथमित्यर्थः अत्यन्तस्वमत्पकर्मणो बन्धुवधरूपे प्रतिधर्मशीलस्य मयोर्वंशोऽ[illegible] अभिप्रायः ३६ ॥ मोऽप्रेरयसि मायवेति संबोधनाभिप्रायः

मधुसूदनी ॥

ननु यदि वध्याएते तर्हि त्वमेवैतान् जहि प्रलये ये जनार्दनेति संबोधनेन यदि वध्यापेते तर्हि त्वमेवेतान् जहि प्रलये जनार्दनेति संबोधनेन सर्वपापासंसर्गित्वादिति सूचयति नन्वग्नि सर्वजनहिंसकत्वेऽपि सर्वपापासंसर्गित्वादिति सूचयति नन्वग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारापहारी च षडेते आततायिन इति स्मृतेरेते षांच सर्वप्रकारेणाततायित्वात् आततायिनमायान्तं हन्यादेवाविचारयन् नाततायिवधे दोषो हन्तुर्भवति कश्चनेति वचनेन दोषाभावप्रतीतेर्हन्तव्या एव दुर्योधनादय आततायिन इत्याशंक्याह पापमेवेति एतानाततायिनोऽपि हत्वा स्थितानस्मान् पापमेवाश्रयेत् न किंचिन्नान्यत्पापमेवाश्रयेदिति संबंधः अथवा पापमेवाश्रयेदिति न हिंस्यादिति धर्मशास्त्रादाततायिन इत्याद्यर्थशास्त्रस्य दुर्बलत्वात् तदुक्तं याज्ञवल्क्येन अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः एवं च प्रयोजनमित्यर्थः ननु हत्वाप्याततायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलत्वात् व्यवहारतः अर्थशास्त्रात्तु बलवत् तथा ततायिनं हन्यादित्यर्थशास्त्रस्य दुर्बलत्वात् व्यवहारतः अर्थशास्त्रात्तु बलवत् स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः

नि॰ ४

वा

गी॰
टी॰
प्र॰

द्धर्मशास्त्रमिति स्थितिरिति अपराधाभावान्न धार्तराष्ट्रान् हन्तुं भव
तां प्रीत्यभावेपि युष्मान् हंता धार्तराष्ट्राणां प्रीतिरल्पेवा न त्वेषु युष्मा
न् हन्युरित्यत आह पापमेवेति अस्मान् हत्वा स्थितानेतानाततायि
नो धार्तराष्ट्रान् पूर्वं पापिनः सांप्रतमपि पापमेवाश्रयेत् नान्य
त् किंचित् सुखमित्यर्थः तथा चायुद्ध्यतोस्मान् हत्वैत एव पापि
नो भविष्यंति नास्माकं कापि क्षतिः पापासंबंधादित्यभिप्रायः ३६
फलाभावादनर्थसंभवाच्च परहिंसा न कर्तव्येति न च श्रेयोनुपश्या
मीत्यारब्धं तदुपसंहरति ॥ स्वदृष्टफलाभावोनर्थसंभवश्च तच्छ
ब्देन परामृश्यते दृष्टसुखाभावमाह स्वजनं हीति माधवेति ल
क्ष्मीपतेस्त्वान्नालक्ष्मीके कर्मणि प्रवर्तयितुमर्हसीति भावः ३७ ॥

सदानंदी टी ॥

नन्वाततायिनो हिंसा न च पापकरी स्मृता अग्निदो गरदश्चैव शस्त्र
पाणिर्धनापहः ५ क्षेत्रदारापहारी च षडेते आततायिनः आतता
यिनमायांतं हन्यादेवाविचारयन् ६ नाततायिवधे दोषो हंतुर्भ
वति कश्चन इति शास्त्रेण हंतव्याः शत्रवश्चेति चेन्नेत्याह ७ पापमे
वाश्रयेदस्मान्न श्रेयोपि कथंचन पापिनो न सुखं किंचिद्दृष्टं नादृ
ष्टमेव वा ८ न हिंस्यात्सर्वभूतानीत्यथ धर्मानुशासनात् अर्थ
शास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृतेः ९ अस्मानयुद्ध्यतो हत्वैतान
त्यतानाततायिनः पापमेवाश्रयेन्नान्यच्छ्रेय इत्यर्थ एव वा ९ पर
हिंसा न कर्तव्या सर्वश्रेयोभिघातिनी तेनैतान्वयं हत्वा योग्याः
स्त्रीघ्नान्घ्नानपि नैवैतेषां वधे दृष्टं सुखं नो भाति माधव नास्मिन्
कर्मण्यलक्ष्मीके प्रवर्तयितुमर्हसि ३७ ॥

नीलकंठी टी॰ ॥

आततायिनः अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहर
श्चैव षडेते आततायिनः आततायिनमायांतं हन्यादेवाविचारयन्
नाततायिवधे दोषो हंतुर्भवति कश्चनेति यद्यप्येवं तथापि एतान्
हत्वा अस्मान् पापमेवाश्रयेत् आततायिवधो हि अर्थशास्त्रविहि
तः न हिंस्यात्सर्वभूतानीति तु धर्मशास्त्रं तच्च पूर्वस्मात्प्रबलं यथो
क्तं याज्ञवल्क्येन स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः अर्थ
शास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिरिति अस्मान्हत्वा एतान्

आनंदी टीका

आततायिनःसतोपिएतानाहत्वापापमेवजलत्वय आततायिनःसतोपिएतानस्माकमाश्रयेदित्यर्थः ३६ ॥ एतदेव विशेषयति तस्मादिति

क्रतेवक्ष्यमाणप्रकारेणआश्रयेदित्यर्थः ३६

रामकंठी टीका

स्पष्टम् ३६ ॥

लासिकी वल्लभी टीका

अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैवषडेते

आततायिनः इति स्मरणादेतेषांसर्वेषामाततायित्वात् आत... मा

तेआततायिनइतिस्मरणादेतेषांसर्वेषामाततायित्वात् नाततायिवधेदोषोह

न्तारिनमाद्यातेहन्यादेवाविचारयन् नाततायिवधेहंतृदोषाभावप्रतीतेह

न्तुर्भवतिकस्मान्नेत्युक्तेरातताथिवधेहंतृदोषाभावप्रतीतेःसार्थेनपापमिति एतानाततायिनो

नत्वापद्वैतेइतितत्राहसार्थेनपापमिति एतानाततायिनो

हत्वास्मान् पापमेवाश्रयेत् नदृष्टादृष्टप्रयोजनं यतोनहि

स्यात्सर्वभूतानीतिधर्मशास्त्रादाततायिनंहन्यादित्यर्थशास्त्र

स्यदुर्बलत्वात् यदुक्तं याज्ञवल्क्येन स्मृत्योर्विरोधेन्यायस्तु बलवान्व्यवहारतः अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थि

तिः यस्मादेवम् ॥ ३६ ॥ नकेवलं पारलौकिकं सुखं नास्ति ऐहिकमपि ने

त्याह स्वजनमिति ३७

मणिवीरसमिद्बोधिनी॥

पापमेवेत्यादि पाप

मितिरूपं चेष्टंहत्वे तावदाक्षांप्रत्युतानिष्टापतिरेवेत्याह पाप

मेवेति एतानाचार्यादीन्हत्वाततायिनः संपन्नानस्मान्पाप

मेवाश्रयेन्नत्वकिंचिदिष्टं स्यात् आततायिलक्षणंच अग्निदे

गरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैवषडेतेआ

ततायिनइति उक्तमर्थमुपसंहरति तस्मादिति यस्मादेव

वधेफलाभावोनर्थापत्तिश्चतस्माद्धेतोः ३७॥

144

आततायिनः पापमेवाश्रयेदित्यपरायोजिता तथाच पापएवास्मद्ध
धेननस्पृंपेत्तनत्तवयमेतेषांवधेन नेष्यामइतिभावः ३६ ॥ ३७ ॥

145

ननु अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः क्षेत्रदारापहर्ताचषडेतेह्याततायिन
इतिस्मृतेरेषां तु योधनादीनां सर्वैःप्रकारैराततायित्वादाततायिनमायान्तं ह
न्यादेवाविचारयन् नाततायिवधेदोषोहंतुर्भवतिकश्चनेतिवचनादुक्तव्याप
त्तेन इत्याशंक्याह पापमेवेति

रामचंद्रसरस्वतीकृतटीका ॥

पापमेवेति स्थितानित्यध्याहृत्यसमानकर्तृकत्वात्[illegible]या शेषंस्पष्टं
नहिंस्यादितिधर्मशास्त्रादाततायिनंहन्यादित्यर्थशास्त्रंदुर्बलमि
तिभावः तदुक्तं अर्थशास्त्रात्तुबलवद्धर्मशास्त्रमितिस्थितिरिति
नचश्रेयोनुपश्यामीत्यारभ्यस्वत्वादिवाक्याभावानेतद्धीस्माकंपु
क्त इतियदुक्तंतदत्रविशेषाभिधित्सयातावन्निगमयति तस्मा
दिति किंच आहूतोननिवर्तेतद्यूतादपिरणादपि विजितंक्षत्रिय
स्यैषुद्धंधर्मोयुद्धजितेचधर्मोधने तथापिश्रेयःसाधनमतोश्रेय॰
स्त्वतद्यदश्रेयोनुबंधि अन्यथासुयोधनादीनामपिधर्मतापत्तेः त
तस्याश्रेयोनुबंधित्वयाप्येतद्विजयादीनामनाकांक्षणीयत्वेनश्रे
यस्त्वाभावात् अस्ययुद्धस्याधर्मत्वेनाकर्तव्यतावदश्रेयोनुबं
धित्वंविजयादीनामाह स्वजनंहीतिसार्धसप्तभिः ॥ ३७ ॥

146

भाषा अनुवाद

जो कहो कि घरमे आग लगाय या विष पिलाय मारे अथवा व
य करनेको खड्ग उठाये और धन हरन करे या भूमि छीनले और
स्त्री हरिलेनेवाला ये छवो आततायी कहाते हैं इनके मारनेमें दो
ष नही है ऐसा शास्त्र अर्थात् नीतिमे लिखा है इस बात पर अर्जु
न उत्तर देते हैं कि यह आपकी अभिप्राय केवल नीति युक्त है पर
धर्मशास्त्रके अपेक्षा यह नीति पक्ष दुर्बल है याज्ञवल्क्यने कहा है
कि नीति और धर्मका जहां विरोध हो तहां स्मृति मूलक युक्ति ब
लवती है और अर्थशास्त्रसे धर्मशास्त्र प्रबल है इससे आततायि
रूप आचार्य आदिकको नाश करनेसे हमको अवश्य महापाप
होगा और इन लोगोंका वध अयोग्य है और अधर्म लोकपरलोक
मे अयश और दुःखका मूल है तो कहो हे माधव हम अपने स्वज
नको विनाश करिके कैसे सुखी होंगे इससे बन्धु समेत धृतराष्ट्र
पुत्रोंको मारनेको मेरी सामर्थ्य नही है ॥ ३७ ॥

दोहा ॥

इन अतितायिनके हने हमे पाप इक होग कौरव सब बांधवको
हमे ताते हनन न योग ३० ॥

147

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः कुल
क्षयकृतं दोषं मित्रद्रोहे च पातकं ३८ ॥

भाष्यं नास्ति आनन्दगिरिकृतटीका ॥

कथं तर्हि परेषां कुलक्षये स्वजनहिंसायां च प्रवृत्तिस्तत्राह यद्य
पीति लोभोपहतबुद्धित्वात्तेषां कुलक्षयादिप्रयुक्तदोषप्रतीत्य
भावात् प्रवृत्तिविस्रम्भः सम्भवतीत्यर्थः ॥ ३८ ॥

स्वामिकृतटीका ॥

ननु चैतेषामपि बंधुवधदोषे समाने सति यथैवैते बंधुवधदो
षमंगीकृत्य युद्धे प्रवर्तंते तथैव भवानपि प्रवर्ततां किमनेन वि
षादेनेत्याशंक्य बुद्धिभेदेन परिहरति यद्यपीति यद्यप्येते धार्तरा
ष्ट्रा लोभोपहतचेतसः तिरस्कृत कर्तव्याकर्तव्यविवेकविज्ञाना
संतः कुलक्षयकृतं गोत्रवधनिमित्तं दोषं मित्रद्रोहे च पातकं न
पश्यंति ॥ ३८ ॥ रामानुजभाष्यम् उपक्रमे ॥ ३८ ॥

अभिनवगुप्तकृत टी॰ ॥

परितापातिशयसूचनायात्मगतमेवाङ्गेनावचनमाह अहोब
तेति ॥ ३८ ॥ परमार्थप्रपा टी॰ ॥

अथ तेपि कथं पुत्रपौत्राविवं तं व्यवहारं न रक्षंतीत्याह लोभोपहत
चेत [illegible] तिराज्यभोगेच्छया [illegible] पहृतत्वकस्मृतिचेतोयेषां तेन तथा उ
[illegible] नभाज्ञाभीति [illegible] कृतत्वात् ॥ ३८

वनमाली टी॰ ॥

[illegible] सपदयति स्वजनहीतिमायालक्ष्मायवः पुनर्भावे
[illegible] ञातितिस्रजनोसमयवः [illegible] विचनेयवः पनिर्वद
[illegible] नाः प्रतिप्रेयद्यविवचनार [illegible] धर्मावलावितेयतीतिना न
[illegible] प्रमोत्रायस्यमायवः माथोलानयमीवलावितेतयतीतिना न
यद्यप्येतेषां बंधुवधदोषे समाने सतिते तमंगीकृत्य युद्धे यदि प्रव
र्तंते तर्हि त्वमपि तथैव प्रवर्तस्व किमनेन विषादेनेत्यत आह यद्य
पीति यद्यप्येते दुर्योधनादयो राज्यलोभेन नष्टविवेकाः कुलवधात्
दोषं न पश्यंति ॥ ३८ ॥ कृतमवैजयन्ती टी॰ ॥
ननु यथा तवैतेवन्धवस्तथा त्वमप्येतेषां बन्धुरत्र तु न संदेहः किं

गी॰
टी॰
प्र॰

148

त्वेते स्वहंतुमकान्वां हन्तुमिच्छामि त्वं त्वति स्नेहाशक्तपतानूहंतुं नेच्छामीति कथमिति चेत्तत्राह, यद्यप्येतेनेति लोभोपहतचेतसः राज्यादिलोभेन नष्टबुद्धयः क्रूरस्वभावा एते दुर्योधनादयः यद्यपि कुलक्षयेन कृतं दोषं मित्रद्रोहे च पातकं च न पश्यंति, तथाप्यस्माभिः कथं न ज्ञेयमित्युत्तरेणान्वयः ३८ ॥

कथं तर्हि येषां कुलक्षये त्वनं हिंसायां वध

मधुसूदनी ॥

लोभोपहतबुद्धित्वात्तेषां कुलक्षयादिनिमित्तदोषप्रतिसंधानाभावात् प्रवृत्तिः संभवतीत्यर्थः अत एव भीष्मादीनां शिष्टानां बंधुवधप्रवृत्तत्वाच्छिष्टाचारत्वेन वेदमूलत्वादितरेषामपि तत्प्रवृत्तिरुचितेत्यपास्तम् हेतुदर्शनाच्चेति न्यायात् तत्र हि लोभादिहेतुदर्शने वेदमूलत्वं न कल्प्यत इति स्थापितम् यद्यप्येते न पश्यंति तथापि कथमस्माभिर्न ज्ञेयमित्युत्तरश्लोकेन संबंधः तदुक्तं यद्यप्येते लोभात्प्रवृत्तत्वात्तथापाहूतो न निवर्तेत युद्धादपीति विहितत्वात् धर्मत्वादिभिः स्वधर्मं युद्धं धर्मोपार्जितं च धर्मेण मिति यः शास्त्रेनिश्चयात् इवतां तैराहूतत्वाद्युद्धप्रवृत्तिरुचितैवेति शंकाह ॥ ३८ ॥

सदानंदी ॥

कथं तर्हि परेषां हि धर्मशास्त्रविदामपि कुलक्षये प्रवृत्तिस्त्वत आहार्जुनो वचः १ लोभाच्छादितबुद्धित्वाद्दोषेऽपि बलवत्तरे भवत्वेषां प्रवृत्तिस्तु नास्माकं सोचितो भवेत् २ नैवदमूलिकास्माकं प्रवृत्तिर्लोभमूलिका शिष्टानामपि न ग्राह्या भीष्मादीनां विवेकिभिः ॥ ३८ ॥

नीलकंठी टी॰ ॥ उपक्रमे ॥ ३८

आनंदी टीका यथा तं वितर्कयति तथैते किं न विचारयन्ति इत्याह यदीति ३८

स्पष्टार्थः ३८ ॥

रामकंठी टीका

स्पष्टम् ३८

लासिकी बलभद्री टीका ॥

ͨयथावं पुत्रवधे प्रवर्तन्ते तथा वि प्रवर्तितामित्यत आह

ͨकुलक्षयकृतं दोषं मित्रद्रोहे च पातकं

ͨएते धार्तराष्ट्रा लोभेन गर्वेणोपहत मलिनीभूते विवेकाभा वमापन्ने चेतो येषां ताहशाः सन्तः यद्यपि न पश्यन्ति मा पश्यन्तु ॥ ३८ ॥

रत्नावीरसमिद्धोधिनी॥

ममेवार्य्य पुनर्द्देतूपन्यासेन द्रढयति स्वजनं हीति ननु यथे वं तर्हि फलाभावेन दोषदर्शनेन वा किमिति परेन विरमंती त्याह यद्यपीति ३८ ॥

149

भाषा अनुवाद ॥

जो कहो कि यह बात दोनो ओर समानहै परन्तुवे लोग इसको
नमानिके जैसे युद्ध करने को तयार खड़ेहै तैसे तुम भी संग्रा
म इनके साथ करो इस बातमें खेद करनेका क्या प्रयोजनहै
इसपर कहतेहै कि राज्यलोभसे विचार रहित दुर्योधन आदि
कुलक्षय कृत दोष ओर मित्र द्रोहसे जो पातक अशुभरूप ति
से नही देखते ओर नही गिनतेहै ३८ ॥

दोहा

हेमाधव कैसे स्वजनके मारे हमसुखी होय यद्यपियह
नहि देखते लोभहरे चितजोय ३८॥

कथंनज्ञेयमस्माभिः पापादस्मान्निवर्तितुं कु
लक्षयकृतंदोषं प्रपश्यद्भिर्जनार्दन ३९ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

परेषामिवास्माकमपि प्रवृत्तिविस्रम्भः सम्भवेदिति चेत्तत्राह कथमिति कुलक्षयेति कुलक्षये मित्रद्रोहे च दोषं प्रपश्यद्भिरस्माभिस्तद्दोषप्रापिते पापं कथं न ज्ञातव्यं तदज्ञाने तत्परिहारासम्भवात्तस्मात् पापान्निवृत्त्यर्थं तत्ज्ञानमपेक्षितमिति पापपरिहारार्थिनामस्माकं न युक्ता युद्धे प्रवृत्तिरित्यर्थः ३९ ॥

स्वामिकृतटीका ॥

हे जनार्दन तथापि अस्माभिः कुलक्षयकृतंदोषंप्रपश्यद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयं निवृत्तये बुद्धिः कर्तव्येत्यर्थः तमेव दोषं दर्शयति कुलक्षयइति ॥ ३९ ॥

रामानुजभाष्यं उपक्रमः ३९ ॥

अभिनवगुप्तकृतटी. ॥ ३९ नास्ति

परमार्थप्रपा ॥

अस्माभिः स्मरणवद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयं किं तत्पापमित्याह किंभूतैरस्माभिः कुलक्षयकृतंदोषंप्रपश्यद्भिः भो जनार्दन संजिहीर्षावेदनेतिशेषः ॥ ३९ ॥

वनमाली ॥

तथा दोषं प्रपश्यद्भिरस्मात्पापान्निवर्तितुं कथं न ज्ञेयं ३९ ॥

ऋषभदेवजयन्ती टी. ॥

नन्वाहूतेन न निवर्तेत द्यूतादपि रणादपीति वचनेन क्षत्रियाणां युद्धादनिवर्तनं निरूपितं परैराहूतस्त्वं कथं निवर्तसे इति चेत्तत्राह कथन्नज्ञेयमिति अस्मात्ज्ञातिवधरूपात्पापान्निवर्तितुं त्वदाश्रितैरस्माभिः कथं न ज्ञेयमपितु ज्ञेयमेवेत्यर्थः कुलक्षयकृतंदोषंप्रपश्यद्भिः ॥ ३९ ॥

कुलक्षयेन कृतं दोषं यत्नत्प्रपश्यद्भिः जनार्दन दुष्टजनान्कंसादीन्मर्दयति पीडयतीति संबोधनेन भवतापि कुलस्य ये वर्त्तंसदयो निहता अतो तेषां वधेतु कर्तृणां विनाशे तत्कुलोचितधर्मविनाशस्तस्मान्महाननर्थोऽभिभवे दतो युद्धान्निवर्तनमेवास्माकं श्रेय इति सूचितम् ॥

मधुसूदनी ॥

अस्मात्पापाद्बन्धुवधफलकयुद्धरूपात् प्रवर्तयः श्रेयः साधनता ज्ञानं हि प्रवर्तकं श्रेयस्त्वनयदश्रेयो न तु बंधि अन्यथा श्येनादी

ननु यद्यप्येते लोभात्प्रवृत्तास्तथाप्याहूतो न निवर्तेत द्यूतादपि रणादपि यस्मात्पार्थिवैः क्षत्रियस्य युद्धं स्वधर्मो युद्धार्जितं च राज्यं धर्म्यमिति धर्मशास्त्रे निश्चयात् भवतां चैतैराहूतत्वाद्युद्धे प्रवृत्तिरुचितैवेति शङ्कायामाह

गी॰
टी॰ ४
अ॰ १८

नामपिधर्मत्वापत्तेः तथाचोक्तं फलतोपिचयत्कर्मनानर्थे
नानुबध्यते केवलप्रीतिहेतुत्वात्तद्धर्मइतिकथ्यतइति ततश्चा
श्रेयोनुबंधितयाशास्त्रप्रतिपादितेपिश्येनादावतिव्याप्तिर्नुद्दिष्टेपिना
स्माकंप्रहृतिरुचितेति एवंचविजयादीनामश्रेयस्त्वान्नानाकांक्षि
तत्वान्नतद्धर्मवर्तित्वमिति द्रष्टव्यमनर्थानुबंधित्वेनाश्रेय
१५१ स्त्वमेवप्रपंचयन्नाह ॥ ३४ ॥

सदानंदी ॥

यद्यप्येतेप्रहृताः स्वर्गभाजदपिशास्त्रतः नवप्रहृतिरुचितविनायु
द्धेचाकामतःपरैः १ आहूतोननिवर्तेतद्यूतादपिरणादपि क्षत्रि
यस्मात्तुधर्मोयमित्यत्राहार्जुनोवचः २ श्रेयःसाधनतांज्ञानेष्ट
रूपस्यप्रवर्तकं अश्रेयोनानुबंधित्वाच्छ्रेयोनोहष्टमात्रकं ३ अ
न्यथाधर्मतापत्तिःश्येनादीनामपीष्यते फलतोपिचयत्कर्मना
नर्थेनानुबध्यते ४ केवलप्रीतिहेतुत्वात्तद्धर्मत्वेनकीर्त्यते यदि
येनेष्टसिद्धिःस्यादनिष्टाननुबंधिना ५ तस्यधर्मत्वमिष्यतेततः
श्येनादिवर्जनं यदात्तुचोदनागम्यःकार्याकार्यानेपत्तया ६ धर्मः
प्रीतिनिमित्तंस्यात्तदाश्येनेपिधर्मता अतोश्रेयोनुबंधित्वाच्छास्त्र
तोपिरणेनतः ७ प्रहृतिरुचितावंध्युवधरूपेजलत्रये ८ ३४ ॥

नीलकंठी ॥

ननुआहूतोननिवर्तेतद्यूतादपिरणादपीतिविजेतुःक्षत्रियस्यमि
त्रयुद्धादनिवृत्तिःहिंसयोःचवृत्तिःक्षत्रियस्येष्टातत्कथंयुद्धान्निवृ
त्तिःहिंसयावृत्तिःक्षत्रियस्येष्टातत्कथंयुद्धान्निवृत्तिमिच्छामी
त्याशंक्याह कथमिति साहिलोभमूलिकास्मृतिःजलत्रयदोष
विधिनाबाध्यते यथा औदुंबरींस्पृष्ट्वोद्गायेदितिस्पर्शनविधिनावि
सर्वावेष्टनवेति
रुद्धासतीऔदुंबरीसर्वावेष्टनस्मृतिर्बाध्यते लोभमूलकत्वात् न
हत् नहिविधिमात्राद्यत्किंचित्कर्तव्यं श्येनादीनामधर्मरूपाणा
मप्यवश्यानुष्ठेयत्वापत्तेः तस्माद्यत्फलतोनर्थानतिदेवविहितं
धर्मरूपमनुष्ठेयं यथोक्तं फलतोपिचयत्कर्मनानर्थेनानुबध्य
ते केवलप्रीतिहेतुत्वात्तद्धर्मइतिकथ्यतइति श्येनादिवत्पापानु
बंधित्वात्तद्युद्धंत्याज्यमेवेत्यर्थः ३४ ॥

आनंदी टीका

एतेदेवविदिवित्सदर्शयति ३९ ॥

रामकंठी टीका

स्पष्टम् ३९

लासिकी [illegible] टीका ॥

अतोऽनिवृत्तावेवबुद्धिः कर्तव्येत्यर्थः पर्यालोचयद्भिः दोषमे
वाह हेजनार्दन अस्माभिः कुलक्षयकृतदोषंप्रपश्यद्भिः
पर्यालोचयद्भिरस्मात्पापान्निवर्तितुं कथंनज्ञेयंनिवृत्तावेव
बुद्धिः कर्तव्येत्यर्थः कुलक्षयकृतदोषमाह ॥ ३९ ॥

रणवीरसमिद्धोधिनी ॥

यद्येषां लोभोपहततयादोषावलोकनमनपेक्ष्य प्रवृत्तिः संहृते
वमस्माकमपिभवत्वित्याशंक्याह कथमिति अस्माद्कुल
[illegible]त्पापात्कुरुवधादेः सकाशान्निवर्तितुमस्माभिः कथं न
ज्ञेयमपितु ज्ञातुं योग्यमेव यतः कुलक्षयकृतं दोषं प्रकर्षे
णापार्यवसानिकफलविचारणात्त्वपेक्षया पश्यद्भिः न त्वेते वि
व लोभोपहततया तदुपेक्षां कुर्वद्भिरिति ३९ ॥

152

भाषा अनुवाद ॥

तौ भी हे जनार्दन हम लोग कुलक्षयकृत दोष जानिके भी इ
स महापापसे कौंन शान्त होय अर्थात् हमको जानि हू कि के
इस युद्धसे निवृत्त होनाही उचितहै ॥ ३९ ॥

दोहा

कुलक्षय करे जो दोस है मित्रद्रोह किये पाप के सें छूटन
नजान हम याहि पापते आप ३९ ॥

153

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ध
र्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ४० ॥

आनन्दगिरिकृतटीका ॥

भाष्यं नास्ति

कोऽसौ कुलक्षये दोषो यद्दर्शनाद्युष्माकं युद्धादुपरतिरपेक्ष्यते २५
तत्राह कुलेति कुलस्य हि क्षये कुलसम्बन्धिनश्चिरन्तना धर्मा
स्तत्तदग्निहोत्रादिक्रिया साध्या नाशमुपयान्ति कर्त्रभावादित्य
र्थः धर्मनाशेऽपि किं स्यादिति चेत् तत्राह धर्म इति कुलप्रयुक्ते ध
र्मे कुलनाशादेव नष्टे कुलक्षयकरस्य कुलपरिशिष्टमखिल
मपि तदीयोऽधर्मोऽभिभवत्यधर्मभूयिष्ठं तस्य कुलं भवतीत्यर्थः
४० ॥

स्वामिकृतटीका ॥

कुलक्षय इति कुलक्षयस्य पारम्पर्येण नरकप्राप्तिकारणत्वं दर्श
यति कुलक्षये गोत्रस्थानां विनाशे सनातनाः पारम्पर्यागताः चिरन्तनाः
कुलधर्माः प्रणश्यन्ति धर्मे नष्टे कृत्स्नमपि कुलं नष्टेऽधर्मोऽभिभ
वति तिरस्करोति उतापि अधर्मोऽभिभवति उद्भवति तन्निवारक
धर्मस्याभावादित्यर्थः ४० ॥

रामानुजभाष्यम् उपक्रमस्थं ॥

अभिनवगुप्तकृतटीका ॥ श्लोकं ॥ ४० ॥ नास्ति

परमार्थप्रपा टी० ॥

अथ कुलक्षये प्रणश्यन्तीत्यादिवाक्यैर्यावदध्यायान्तं पापपर्यवसि
तमर्थमुक्तवान् ॥ ४० ॥

वनमाली टी० ॥

तमेव दोषं दर्शयति कुलेति परम्पराप्राप्ताः प्रवर्तकाभावात्तत्तो
वसिष्टं कृत्स्नमपि कुलमधर्मो व्याप्नोति ४० ॥

जगन्मैवैजयन्ती टी० ॥

ननु कोऽसौ दोषो यतो युद्धात्त्वं विरमसीत्यपेक्षायां तमेव दोषमाह
कुलक्षय इति कुलक्षये सति सनातनाः परम्पराप्राप्ताः कुलधर्माः
कुलोचितधर्माः प्रणश्यन्ति नाशं प्राप्नुवन्ति कर्तॄणामभावाद्धर्मेण

गी॰ मध्यभावइत्यर्थः धर्मे नष्टे सति जातित्वेनैकवचनं कृत्स्नं समग्रं
टी॰ कुलमुतापि अधर्मोऽभिभवति स्वाधीनं करोति समस्तकुलमभिव्या
प्र॰ प्यकुलीनैः प्राणिभिः स्वानुकूलं कर्म कारयतीत्यर्थः ४० ॥

मधुसूदनी ॥ एवं च विजयादीनामश्रेयस्त्वेनानाकांक्षितत्वान्न तदर्थं प्रवर्तितव्यमिति द्रष्टव्यं तन्नमनर्थानुबंधित्वेनाश्रेयस्त्वमेव प्रपंचयन्नाह

सनातनाः परंपराप्राप्ताः कुलधर्माः कुलोचिता धर्माः कुलक्षये प्र
णश्यन्ति कर्तुरभावात् उतापि अग्निहोत्राद्यनुष्ठातृपुरुषनाशे
न धर्मे नष्टे जात्यभिप्रायमेकवचनम् अवशिष्टं बालादिरूपं कृ
म त्स्नमपि कुलं अधर्मोऽभिभवति स्वाधीनतया व्याप्नोति उतशब्दः कृत्स्न
154 पदेन संबध्यते ४० ॥

सदानंदी ॥

महापापादिहेतुत्वात्कुलपित्रादिहिंसनात् सिद्धोऽस्य परिरंसायाः प्रा
हवाक्यानि शास्त्रवित् १ धर्माः परंपराप्राप्ताः प्रणश्यन्ति कुलोचि
ताः कुलक्षये यतः कर्तुरभावो दृश्यते तितो २ धर्मक्षये कुलं
सर्वमाबालमपि सर्वथा अधर्मः स्ववशीकृत्वा व्याप्नोति श्रेष्ठाय यत्पतः ३

नीलकंठी ॥

प्रणश्यन्ति अनुष्ठातॄणां वृद्धानामभावात् अवशिष्टं बालादिरूपं वं
शं धर्मलोपादधर्मोऽभिभवति ४० ॥

आनंदी टीका एतदेव विविच्य दर्शयति

कुलक्षयेऽनुष्ठातॄणामभावात्कुलधर्मा अदृष्टफलानि
त्यनैमित्तिकाश्राद्धादयः दृष्टफलाश्च स्त्रीरक्षादयः प्रणश्यन्ति
ध० ॥

रामकंठी टीका

स्पष्टम् ध०

लाक्षिकी [illegible] टीका ॥

गोत्रपुरुषविनाशे सति सनातनाः पारम्पर्यागताश्चिरन्तनः
धर्मे नष्टे सति [illegible] बालादिरूपम् तिरस्करोति ध० ॥
कुलधर्माः प्रणश्यंति धर्मे पुनर्नष्टे अवशिष्टं बालादिरूपं कृ
त्स्नमपि कुलमधर्मोऽभिभवति तिरस्करोति ध० ॥

रणवीरसमिद्बोधिनी ॥

कुलक्षये दोषस्वरूपमाह कुलक्षये इत्यादि कुलसंबंधिनोध
र्माः सदा प्रणश्यंति कर्तॄणामभावादिति भावः धर्मनाशादेरुत्त
रोत्तरमनर्थरूपं कार्यं दर्शयति धर्मे नष्टे इत्यादि कृत्स्नं कुलं
नाशादवशिष्टं ध० ॥

155

भाषा अनुवाद

सोइ जलक्षय कृत दोष कहतेहैं कि जलक्षय करनेसे सनात
न जो जलधर्म सो नष्ट होताहै और धर्महानिहोनेसे वाकी
जो जल उसे अधर्म ग्रसिलेताहै ४॰ ॥

दोहा ॥

जलक्षय करै जो दोष को देखन दिय उनाथ जलक्षय भय
तेनासदें जलके धर्म सनाथ ४॰ ॥

156

अधर्माभिभवात्कृष्ण प्रदुष्यंतिकुलस्त्रियः स्त्री
षुदुष्टासुवार्ष्णेय जायतेवर्णसंकरः ४१ ॥

भाष्यंनास्ति

आनन्दगिरिकृतटीका ॥

कुलक्षयकृतेऽवशिष्टकुलस्याधर्मप्रवणत्वे को दोषः स्यादि
ति तत्राह अधर्मेति पापप्रचुरे कुले प्रसूतानां स्त्रीणां प्रदुष्ट
त्वे किं प्रदुष्यन्ति तत्राह स्त्रीष्विति ४१ ॥

स्वामिकृतटीका ॥

अधर्मेति हे कृष्ण गोपिकामनःकर्षणशील अधर्माभिभवा
त्कुलस्त्रियो विशुद्धवंशोद्भवाः प्रदुष्यंति स्वैरिण्यो भवंति ताः
स्त्रीषुदुष्टासु हे वार्ष्णेय वृष्णिवंशोद्भव वर्णसंकरोजायते
वर्णस्य वर्णांतरमिश्रीकरणं वर्णसंकरः ४१ ॥

रामानुजभाष्यम् उपक्रमेः ॥ ४१ ॥

अभिनवगुप्तकृतटीका ॥ ४१ ॥ नास्ति

परमार्थप्रपा ॥

सनातनाःपरंपराप्राप्ताः वर्णसंकरः सर्ववर्णानामेकीभावः ४१

वनमालीटी० ॥ पूर्वश्लोकान्तरे ४१ ॥

उत्तमवैजयन्ती टीका ॥

अध अधर्माभिभवादिति यस्मादधर्मेणाभिभूते कुले तस्माद्धेतोः कु
लस्त्रियः कुलोचितधर्मवत्यः स्त्रियः प्रदुष्यन्तिनिजकान्ताभा
वे मनोभवाकुलितचित्ताः परपतिं रतिंकृत्वा भ्रष्टा भवंतीत्य
र्थः ननु येनैव यत्कृतं पापं पुण्यं वा विजितात्मना भोक्तव्यं पुरु
षेणैव तेन तत्तत्फलं महदित्यादिवाक्यैर्निजकर्मफलानां स्वेनै
व भोक्तव्यत्वात्स्त्रीणां कर्म स्त्रीभिरेव भोक्तव्यमेतेन तव किमिति
चेत्तत्राह स्त्रीष्विति दुष्टासु भ्रष्टासु स्त्रीषु वर्णसंकरो ब्राह्मणादि
वर्णविरहितो जायते उत्पद्यते वार्ष्णेय अतिशुद्धवर्णाश्रमोचित
धर्मानुष्ठानतत्पर वृष्णिवंशोद्भवान्मम मातुलाद्वसुदेवात्त्वमः
पि जातोसि अतस्त्वत्पक्षसेयानामस्माकं कुले संकरो माभूत्त्वां
प्रार्थयामीति संबोधनाभिप्रायः ४१ ॥

मधुसूदनी ॥

अस्मदीयैः पतिभिर्धर्ममतिक्रम्य कुलक्षयकृतश्चेदस्माभिरपि

गी॰ टी॰ प्र॰

व्यभिचारे कृते को दोषः स्यादित्येवं कृतनर्कहताः कुलस्त्रियः प्रदु
ष्येयुरित्यर्थः अथवा कुलक्षयकारिपतितपतिसंबंधादेव स्त्रीणां
दुष्टत्वं आपस्तंबः संप्रतीतो हि महापातकदूषितः स्यादिति स्मृतेः ॥ ४१

सदानंदी ॥

अस्मदीयैः पतिभिरतिक्रम्य स्वधर्मतः कुलक्षयः कृतो यर्हि त
र्ह्यस्माभिरिहाधुना १ व्यभिचारे कृते कः स्याद्दोषस्त्यक्तकैतवाः
कुलस्त्रियः प्रदुष्येयुरधर्माधिक्यहेतुना २ ताश्च दुष्टास्तु नीचाभि
गमनात्संकरो भवेत् इत्थं वर्णावतीर्णत्वादत्ता साचेद्योषा दोष
तः ३ । ४१ ॥

157

नीलकंठी ॥

दुष्टासु प्रकार्थवर्णेनतस्थु पासीनास्व ॥ ४१ ॥

आनंदी टीका

कुलस्त्रियः प्रदुष्यन्ति चारित्रहीना व्यभिचरन्तीत्यर्थः ४१

रामकंठी टीका ॥

स्पष्टार्थम् ४१

अधर्माभिभवात्कुलस्त्रियो विष्णु दुष्टासु
इव शोद्भवाः प्रदुष्यं

स्वामि की टीका

हे कृष्ण स्त्रियो विलोपा भवन्ति हे वृष्णिवंशोद्भव॥ स्त्रीषु सतीषु वर्णो
संकरो जायते वर्णस्य वर्णान्तरेण मिश्रीभावः संकरः ४१

यशावीरसमिद्धोधिनी॥

वर्णा
प्रदुष्यंति शीलभ्रष्टा भवंति वर्णांतरैः सह व्यभिचारात्
नां संकरो मिश्रत्वं ४१॥

154

रामचंद्रसरस्वतीकृतटीका ॥
प्रदुष्यंतिकुलस्त्रियइतिताहितदाएवंविचारयेयुर्यदस्मदीयैः
पतिभिःकुलक्षयःकृतश्चेदस्माभिर्व्यभिचारेकृतेकोदोषःस्यादि
तितथाच ताःप्रदुष्यंतीतिभावः [illegible] [illegible]यद्वाकुलक्षयकारिपतित
पतिसंबंधादेवदुष्टत्वं [illegible]त्रासुद्रैःसंप्रतीक्ष्योदिमहापातकदूषितइति
स्मृतेः स्पष्टमन्यत् ४१

159

भाषा अनुवाद ॥

अधर्मके जोरसे कुल कामिनी सब भ्रष्ट आचारनी होतीहैं औ
र स्त्रियोंके दुष्ट आचरनसे वरन संकर पैदा होतेहैं ॥ ४१ ॥

दोहा

धर्मनाशके होतहि कुलसमनाशहिंहोय होयअधर्मकी
वृद्धि सुनयह निश्चयकरसोय ४१ कुलअधर्मभयजाय
हलिजहहनोकुनारीते वर्णसंकरहो
नीकुलकीनारीहोय
सोय ४१॥

160

संकरो नरकायैव कुलघ्नानां कुलस्य च पतं
ति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ४२ ॥

भाष्यंनास्ति आनन्दगिरिकृतटीका ॥

वर्णसंकरस्य दोषपर्यवसायितामादर्शयति संकर इति कुल
क्षयकराणां दोषान्तरं संचिनोति पतन्तीति कुलक्षयकृतां पि
तरो निरयगामिनः सम्भवन्तीत्यत्र हेतुमाह लुप्तेति पुत्रादीनां
कर्तॄणामभावात् लुप्तापिण्डस्योदकस्य च क्रिया येषां ते तथा
ततश्च प्रेतत्वपरिहृतिकारणाभावात् नरकपतनमेवावश्यक
मापन्नेदित्यर्थः ॥ ४२

स्वामिकृतटीका ॥

संकर इति संकरो जातिसंकरः कुलघ्नानां चापरे कुलघ्नकुलस्य च
नरकायैव भवति यस्माद्देषां कुलघ्नानां कुलहन्तॄणां न केवलमेव
कुलं नरकाय भवति किंवा पूर्वेषां कुलघ्नानां स्वर्गीहृणां पितरः लु
प्तपिंडोदकक्रियाः संतो नरके पतन्ति पिंडादिदातॄणां विशुद्धापत्या
नामभावात् लुप्तपिंडोदकक्रियाः संतः पतन्तीत्यर्थः ४२ ॥

रामानुजभाष्यम् ॥ उपक्रमः ४२ ॥

अभिनवगुप्तकृतटीका ॥ पूर्वं ॥ ४२ ॥ नास्ति

परमार्थप्रपा टी॰ ॥

लुप्तालोपंप्राप्ताः पिंडक्रियाः श्राद्धाद्याः उदकक्रियास्तर्पणाद्याः ४२

वनमाली टी॰ ॥ उपक्रमः ४२ ॥

उत्तमवैजयन्ती टी॰ ॥

यस्मादेवं त्वं बिभेषि स संकरो वीरशिरोमणे त्वया मंगलं किं करिष्य
नीत्याशंक्याह संकर इति संकरो जन्ममात्रेणैव कुलं घ्नन्तीति कुल
घ्नास्तेषां दुष्टानां मध्ये च कुलस्य तेषां च कुलस्यानेकपुण्यपुंजा
र्जितममरलोकं गतस्य पितृपैतामहादेर्नरकायैव भवति न त्वम
लोकांतरप्राप्तये हि यस्मात्कुलघ्नानामेषां पितरो लुप्तपिंडोदक
क्रियाः लुप्ताः पिंडोदकक्रिया येषां ते तथा संतो नरकादिषु पतन्ति
तस्माद्धेतोर्वर्णसंकरादहं बिभेमीत्यर्थः ॥ ४२ ॥

मधुसूदनी ॥

कुलस्यसंकरश्चकुलघ्नानांनरकायैवभवतीत्यन्वयः नकेवलंकुलघ्नानामेवनरकपातः किंतुतत्पितॄणामपीत्याह पतंतीति हिशब्दोऽप्यर्थे हेतौवा पुत्रादीनांकर्तृणामभावात् लुप्तपिंडस्योदकस्यच क्रियायेषांतेतथाकुलघ्नानांपितरःपतंतिनरकायैवेत्यनुषंगः ४२

16

सदानंदी ॥

कुलस्यसंकरोयस्मात्कुलघ्नानामवीविदः नकेवलंकुलघ्नानांपितॄणामपिनस्तथा १ पुत्रादीनांहिकर्तृणामभावादेवसर्वथा लुप्तायेषांक्रियाःसर्वाःपिंडस्याप्युदकस्यच २ कुलघ्नानांपतंत्येवपितरोनरकेचिरं ३॥ ४२ ॥

नीलकंठी ॥

कथंतर्हिजामदग्न्येनरामेणक्षत्रियेषुहतेषुतत्स्त्रियःपुनःपुनर्ब्राह्मणेभ्यःपुत्रान्जनयामासुरित्युपाख्यायतेकथंवाधृतराष्ट्रादीनांअसंकरजत्वमित्याशंक्याह पतंतीति हिशब्दोवैदिकींप्रसिद्धिंद्योतयति साहिनशेषोअग्नेअन्यजातमस्तीतिश्रुतिः अन्यस्माज्जातंशेषोपत्यंनास्तीतितदर्थः अन्योदर्योमनसापिनमंतवोममायंपुत्रइतियास्कवचनाच्च येयजामहइत्याम्नानात् येवयंस्मस्तेवयंयजामहइत्यर्थकाहूयमानस्यपित्रादेःसंशयग्रस्तत्वादयंममपितेवेतिनिश्चयस्यदुःसाध्यत्वात् मंत्रश्चयोहमस्मिससन्यजे ब्राह्मणार्थवादश्च नचैतद्विद्मोब्राह्मणाःस्मोवयमब्राह्मणावेति तस्माद्बीजपतेरेवपिंडादिप्राप्तिर्नतुक्षेत्रपतेरितिलुप्तपिंडोदकक्रियत्वादवश्यंपितॄणांपातोभवति क्षेत्रजपुत्रस्मृतिस्तुइहलोकेवंशस्थापनमात्रपरानतुतेनक्षेत्रपतेःकश्चिदामुष्मिकउपकारोस्ति उदाहृतश्रुतिविरोधात् अयंचसंकरोस्माभिःस्वयंकृतश्चेदवश्यमस्मान्बाधिष्यतएवेतिभावः ४२ ॥

ज्ञानेदी टीका

वर्णसंकरः कुलस्यात्तीणस्यनरकायैवसन्ततेरछुद्दत्वात् । हिय कुलघ्नानां चनरकायवर्णसंकरोत्पत्तौनिमित्तत्वात् लुप्तपिंडोदकः स्माद्भयेषांपितरःछुद्दायाः संततेरभावात् पतंति ४२ ॥

रामकंठी टीका

स्पष्टम् ४२

लासिकी ~~वल्लभी~~ टीका

जातिसंकरोनकेवलंकुलघ्नानांकुलहन्तृणामेवनरकाय भवति किंतुकुलस्यचयमीतस्य पितृवर्गस्यचनरकायभ भवति किंतुकुलस्य ... कुलहंतृणाम् ... वति ... पिंडक्रियोदकक्रियाश्रयेषां ४२ दिक्रियाकत्रभावाल्लुप्ताः पिंडक्रियोदकक्रियाश्रयेषां ४२ तादृशाः संतः पतंति नपरंकुलघ्नानांतत्पितृणांचसंकर दोषेणनरकावाप्तिः यावत्पश्चादवशिष्टस्यापत्यस्यरूपस्य वा लकसम्बन्धस्यापि तत्प्राप्तिर्भवतीत्याहद्वाभ्याम् ४२ ॥

यतएषां पितरः

नरके

॥ ... ॥

पतंतीति हियस्मात् तस्मा

कथंनरकप्राप्तिः संकरादित्याह पतंतीति हिदैतोरेषां कुलघ्ना पिंडस्योदकतर्पणस्यच क्रियायेषामिति

नापितरोनरकेपतंति ४२॥

162

भाषा अनुवाद

तो फिरि वरनसंकर कुलघातियों के कुलको नरकका हेतु हो
तेहै और इससे कुल नाशकों के पितर पिण्डपानीसे रहित
हो नरकमें पड़तेहैं ॥ ४२ ॥

दोहा ॥

पतितहोत
कुलघातिकेकुललियें संकरनरक प्रदाय
इनकेपितर पिंडोदक किया जाय ४२ ॥

163

दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः उत्सा
द्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ४२ ॥

क भाष्यं नास्ति आनन्दगिरिकृतटीका ॥

कुलक्षयकृतामेतैरुदाहृतैर्दोषैर्वर्णसंकरहेतुभिर्जातिप्रयुक्ता
श्च धर्माः सर्वे समुत्साद्यन्ते तेन कुलक्षयकारणयुद्धादुपरति
रेव श्रेयसीत्याह दोषैरिति ४२ ॥

स्वामिकृतटीका ॥

उक्तदोषमुपसंहरति दोषैरितिद्वाभ्यां एतैर्नामधर्माभिभवादि
लक्षणैर्वर्णसंकरकारकैर्दोषैः कुलघ्नानांजातिधर्माः क्षत्रियजा
तिप्रयुक्तधर्माः तथा शाश्वताः कुलधर्माः पारंपर्यागतावंशधर्मा
श्च उत्साद्यंते लुप्यंते तेषामाचरणं न भवतीत्यर्थः चकारादाश्रम
धर्मादयोपि गृह्यंते ४२ ॥

रामानुजभाष्यम् उपक्रमे ॥ ४२

अभिनवगुप्तकृतटीका ॥ ४२ नास्ति

परमार्थप्रपाटी० उपक्रमे ४२ ॥

वनमालीटी० ॥ ४२ ॥ नास्ति

कुसुमवैजयन्तीटीका ॥

एवमुक्तदोषमुपसंहरति दोषैरितिद्वाभ्यां दोषैरिति वर्णसंकरका
रकैर्वर्णानांब्राह्मणादीनांसंकरंसंमेलनंकुर्वंतीति तथातैरेतैर्दो
षैः कुलघ्नानां पुरुषाणां जातिधर्माः क्षत्रियत्वादिनिबन्धनाः शा
श्वताः परंपराप्राप्ताः कुलधर्माश्चासाधारणाश्च उत्साद्यन्ते उत्सन्नाः
क्रियन्ते नाशंपतइत्यर्थः ॥ ४२ ॥

मधुसूदनी टी० ॥

जातिधर्माः क्षत्रियत्वादिनिबंधनाः कुलधर्माश्चासाधारणाश्चएते
दोषैरुत्साद्यंतेउत्सन्नाः क्रियंतेविनाशंपतइत्यर्थः ४२ ॥

सदानंदी ॥

येत्वसाधारणधर्माः स्वकुलस्य चिरंतनाः उत्साद्यंते जातिधर्माः क्ष
त्रियत्वादिहेतुकाः १ ॥ ४२ ॥

गी॰
टी॰
प्र॰

नीलकंठी ॥

एतदेवविवृणोतिद्वाभ्यां दोषैरिति ४३ ॥

164

आनंदी टीका

एतैः कुलधर्मनाशाधर्माभिभवस्त्रीव्यभिचारैर्वर्णसंकरका
रकैर्दोषैर्जातिधर्माः क्षत्रियत्वादिजात्याश्रितायधर्मानित्यने
मित्तिकाउत्साद्यन्ते शोकप्रकारेणपातित्येनतत्रानधिका
राद्विलीयन्ते चपुनःकुलस्यपुत्रपौत्रादिसंततेर्धर्माःशाश्वता
ग्रनवच्छिन्नाःश्राद्धदानादिधर्मास्तत्रालोकानन्तर्यप्राप्ताद
यउत्साद्यन्ते ४२ ॥

रामकंठी टीका

स्पष्टम् ४२

लासिकी [illegible] टीका

कुप्रलोभाभिभय[illegible]तैः विना[illegible]नवतीय
धैः क्षत्रियत्वादिजातिप्रयुक्ताः[illegible]धर्मास्तः कुलध
मश्च नकेवलंकुलस्य[illegible]संकरदोषेणनरका
[illegible]
वा[illegible]
नत्वाभिभवतीत्याह दोषैरिति[illegible] ४२ ॥
एतैःकुलनाशस्यधर्माभिभवादिलक्षणैर्वर्णसंकरकारकैः
कुलघ्नानांदोषैःक्षत्रियत्वादिजातिप्रयुक्ताःधर्मास्तथाशा
श्वताःपारंपर्यागताःकुलधर्माश्चोत्साद्यन्ते विनाश्यन्ते ते
षामाचरणंनभवतीत्यर्थः चकारादाश्रमादयोपिदृश्यन्ते ४२ ॥

रणवीरमसिद्धोधिनी ॥

इतिनष्टस्यकुलस्यनिरयगतिमुक्त्वाकुलघ्नानामपितामाह
दोषैरिति स्पष्टं ४२ ॥

165

भाषा अनुवाद ॥

कुलघातियोंके वरन संकर करने वाले इन दोषों से सनातनी जातिधर्म और कुलधर्म आश्रमधर्म सबउच्छिन्न होजातीहै इ ससे कुलनाशकारी युद्धसे निवृत्त होनाही परम कल्यानहै ॥ ४२ ॥

दोहा

वर्णसंकरकृतदोषसें कुलघातिन के पर जातिधर्मकु

लधर्म नितनाशत नाहिंसंदेह ॥ ४३॥

166

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन नर-
केनियतंवासो भवतीत्यनुशुश्रुम ४४ ॥

भाष्यं नास्ति

आनन्दगिरिकृतटीका ॥

किञ्च जातिधर्मेषु कुलधर्मेषु च उत्सन्नेषु तत्तद्धर्मवर्जितानां मनुष्याणामनधिकृतानां नरकपतनध्रौव्यादनर्थकरमिदमेव हेयमित्याह उत्सन्नेति यथोक्तानां मनुष्याणां नरकपातस्यावश्यकत्वे प्रमाणमाह इत्यनुशुश्रुमेति ४४ ॥

स्वामिकृतटीका ॥

उत्सन्नेति हे जनार्दन उत्सन्नकुलधर्माणां विनष्टकुलवर्णाश्रमादिधर्माणां नरके नियतं नियमेन वासो भवतीति वयमनुशुश्रुम श्रुतवन्तो वयं प्रायश्चित्तमकुर्वाणः पापेषु निरताः नराः अपश्चात्तापिनः कष्टान्निरयान्यान्ति दारुणान् इत्यादिवचनेभ्यः ४४ ॥

रामानुजभाष्यम् ॥ ४४ ॥ उपक्रमम्

अभिनवगुप्तकृतटी० ॥ ४४ ॥ नास्ति

परमार्थप्रपाटी० ॥

उत्साद्यन्ते लुप्यन्ते अनुशुश्रुम श्रुतवन्तः ॥ ४४ ॥

वनमालीटी० ॥ ४४ ॥ नास्ति

कुलमवैजयन्ती ॥

उत्सन्नेति उत्सन्नजात्यादिधर्मे नष्टे सति किं स्यादित्यपेक्षायामाह उत्सन्नेति उत्सन्नाः नाशं गताः कुलधर्मा असाधारणधर्मा येषां कुलधर्माणां उत्सन्ना नाशं गताः तेषां मनुष्याणां वासो नियतं निश्चितं नरके भवतीति व्यासधौम्यादीनामाचार्याणां मुखादुपदेशं वयमनुशुश्रुम श्रुतवन्तः ४४ ॥ तुरं

मधुसूदनी ॥

नरकएव नियतं वासो भवति प्रायश्चित्तस्य तत्त्वपराहतिकारणभावात् वयं श्रुतवन्तः न स्वाभूतमितिअनुशुश्रुमेति आचार्याणां मुखादुत्प्रेक्षितत्वं पूर्वोक्तस्यैव दृढीकरणम् ४४ ॥

सदानंदी टी० ॥

नहि कुलनाशकलजनयोः [illegible] हे जनार्दन
प्रतिकूल[illegible] जनात्
[illegible] ४

ततःप्रेतत्वमुक्त्यर्थंकारणाभावतश्चिरं नरकेचैववासःस्याद्
वंनातःस्तुनिष्कृतिः १ आचार्याणांगुरोर्वादित्यक्तवंतोवयंप्रा
जनानांदेवशस्त्राणांप्राणादीनांवियोगतः २ यातनागमथित्व
त्वायतस्त्वंश्रीजनार्दनः अतोमांप्रेरयस्येवंकिंत्वांशरणमागतं
३ ॥ ४४

नीलकंठी टी॰ ॥ उपक्रमे ॥ ४४ ॥

आनंदी टीका

पतेदेवदृढयति वर्णसंकरदोषान्नरकेनियतंनिश्चयेनप्रेत
त्वनिहन्तिकारणाभावान्निरंतरंवासोभवतीत्यनुशुश्रुम वं
यमनुश्रवाद्वेदादिदंश्रुतवंतः नतुस्वयमुत्प्रेक्षामः तथा
वश्रुतिः प्रायमनादिरक्ततंतमेतंतमावःप्रेतेपरेवीजान्य
वाप्नुः जनयित्वप्रत्तेभवतिसामायायेमोचवेनाकृतेनेतेन
मेतमिति स्मृतयश्चाग लोकानंत्यंदिवःप्राप्नुयत्प्रपौत्रप्रत
चैकैः यस्मात्तस्मात्प्रियासेव्याकर्तव्याश्चस्वहिताः यस्मा
देवंप्रत्यादिहेतवःस्त्रियोतःसेव्याःऋतुकालेभिगंतव्याः च
प्रतोभिचारपरिहारायस्वरक्षिताःकर्तव्याःअभिचारोत्पत्रैः
प्रपौत्रैर्नैतत्फलमित्यर्थः ४४ ॥

रामकंठी टी०
स्पष्टम् ४४

वल्लभी टीका लासिकीटीका
गांसा विनष्टकुलवर्णाश्रमादिध
धर्माननभिज्ञातेनननदा वरणात् अन्नवारंवारंव्यासादिभ्यःश्रुतवं
मोणोश्चितेनियमेनांस्थितिः परिताणातिशयमहच
तोवयम् ननुस्वयमूहेन कल्पयामः ४४ ॥
तायात्मगतमेवाजुनोवचनमाह

इत्यवीरसमिद्धोधिनी॥

ततश्च किमित्याह उत्सन्नेति इत्यनुशुश्रुम व्यासादिभ्यः स
कामादनुक्रमादागतमित्यंश्रुतवंतइत्युत्सन्ननातिकुलय०
मीणामयोगतोप्रमाणंदर्शितं ४४॥

भवनीतिचयमनुशुश्रु

168

रामचंद्रसरस्वतीकृतटीका ॥

यद्वाकुलक्षयकारिपतितपतिसंबंधादेवदुष्टत्वे आत्मशुद्धेः
संप्रतीक्ष्योहिमहापातकदूषितइतिस्मृतेः स्पष्टमन्यत् इदानी
मतिविषादाद्भगवतासहसंवादंपरित्यज्य स्वयमेव स्वीयया
पितामन्वशोचति ॥ ४४ ॥

169

भाषा अनुवाद ॥

और हे जनार्दन जिन मनुष्यों के कुलधर्म और जातिधर्म उच्छि
न्न होगये उनको निरन्तर घोर नरकमें वास होतीहै यह मैने
पुराण इतिहास और धर्मशास्त्रमे सुनाहै ॥ ४४

दोहा

नाशकरैं कुल धर्मकों जे मनुष्य यदुनाथ होतवासनिश्चय
नरक तिनको सुनियहगाथ ४४ ॥

170

अहोबतमहत्पापं कर्तुंव्यवसितावयं यद्राज्य
सुखलोभेन हंतुंस्वजनमुद्यताः ४५ ॥

भाष्यंनास्ति

आनंदगिरिकृतटीका ॥

राज्यप्राप्तिप्रयुक्तसुखोपभोगलुब्धतया स्वजनहिंसायां प्रवृत्ति
रस्माकं गुणदोषविभागविज्ञानवतामतिकष्टेति परिभ्रष्टहृ
दयःसन्नाह अहोबतेति ४५ ॥

स्वामिकृतटीका ॥

बंधुवधव्यवसायेनसंतप्यमानआह अहोबतेति अहोबतक
ष्टंयत्परमेश्वरसन्निधानेपिवयंमहत्पापंयद्राज्यसुखलोभेन
स्वजनंहंतुमुद्यताइतिउत अतिशयेनयत्नायत्नवंतोजाताः ४५

कर्तुंव्यवसिता व्यवसायं निश्चयंगताः किं तन्महत्पापं

रामानुजभाष्यम् ॥ ४५ उपक्रमम्

अभिनवगुप्तकृतटीका ॥

वयमिति कौरवपांडवभेदभिन्नाः सर्वएवेत्यर्थः एवंसर्वेषा
विवेकिषुममविवेकिनः किंतुचिते उचितेतावद्युद्धान्निवर्त
ने एतत्तूचिततरमित्याह ॥ ४५ ॥

परमार्थप्रपा टी॰ ॥

अहोबतेतिबंधुवधसंतापकथनं ॥ ४५ ॥

वनमाली टी॰ ॥ ४५ ॥ नास्ति

उत्तमवैजयन्ती टी॰ ॥

एवंदोषदर्श्यपित्विदानींराज्यलोभेनास्माकंस्वजनवधस्यानिश्च
योप्यतितद्धोद्धकरणस्यतत्कावर्तीतिवक्तमतिसंतप्यमानः
आत्मानंशोचन्नाह अहोबतेति यद्यस्मात्स्वल्पराज्यसुखलो
भेनस्वजनंहंतुमुद्यताः शास्त्राहैस्स्वजनैर्मानानांस्थितानांस्मा अतो
वयंमहत्पापंकर्तुंव्यवसिता निश्चयंकृतवंतोऽहोबतास्मानधिग्
धिगस्त्वित्यर्थः ४५ ॥

मधुसूदनी ॥

यदीदृशीतेबुद्धिः उत तर्हि युद्धाभिनिवेशेनागतोसीतिनवक्त
व्यमविमृश्यकारितयामयोद्धत्यस्यकृतत्वादितिभावः ४५ ॥

बंधुवधपर्यवसाययुद्धाध्यवसायोपि सर्वथा पापिष्ठतरः किं पुनर्युद्धमिति
आत्मानं शोचयन्नाह
वक्तुं तदध्यवसायेन

गी॰
टी॰
प्र॰

सदानंदी ॥

स्वकुलक्षयकारित्वात्पापित्वेप्युद्धनिश्चयः किंयुद्धस्यपुनर्वा
च्यंडघ्त्वमितिभावनात् । शोकमोहैकपाथोधौनिमग्नःप्राहडः
खितः अहोवतेति धर्मोपिपापबुद्धिमतोवचः २॥ ४५ ॥

171

नीलकंठी टी॰ ॥ स्पष्टं ॥ ४५ ॥

आनंदी टीका

अहोविस्मये वतविषादेवयमिति सर्वेथार्तराष्ट्रमज्ञानवश्च
४५ ॥

रामकंठी टी॰

स्पष्टम् ४५

लाखिकी ~~वल्लभी~~ टीका

परि[illegible]नायशा[illegible]वलवननमनेनजाह
[illegible]इति ४५ अहोवतकष्टंवयंकौरवपांडवभेदभिन्नाः स
वेएवमहत्पापंकर्तुंव्यवसितानिश्चयवन्तउत्साहवंतोवास्मः
किंतन्महत्पापम् यद्राज्यसुखलोभेनहन्तुंस्वजनमुद्यताय
त्वंवंतोजाताः नन्वेतसर्वेबंधुवधोयमिनोद्युद्धंकरिष्यत्येव
किंतवहृष्याविवेकितयेत्यर्थः [illegible] ४५ ॥

दयावीरसमिद्धोधिनी

मोहेनात्माविष्टःपुनराह अहोवतेति स्वजनवधरूपमेवपा
पमितिभावः ॥ ४५॥

172

५ इदानीं मतिविभ्रमाद्भगवता सह संवादं परित्यज्य स्वयमेव स्वीयपापितामनु
शोचति

रामचंद्रसरस्वतीकृतटीका ॥

५ अहोवतेति यद्वा यदीदृशी ते बुद्धिः अतस्तर्हि युद्धाभिनिवेशो
नागतोसीति आशंक्य विश्वरूपकारितामपाकृत्यानुशोचति
अहोवतेति स्पष्टः [illegible] किं विधेयमित्याह ॥ ४५

173

भाषा अनुवाद

देखो गुरण दोषके विशेष ज्ञानवान होके भी जो हम राज्य
सुखके लोभसे स्वजन बंधु लोगोंको संग्राममें मारनेको
तयार होगये कि ऐसे महापाप कर्म करनेका उद्योग किया
हाय यह बडा कष्ट और विषाद भया बंधु वधसे महापाप ।
छोड और क्या हाथ लगनाहै ४५ ॥

दोहा॥

अहोअचर्यमहापापको करयोहमउद्योग बंधुहननउद्य
तभए लोभराज्यसुखभोग ४५॥

174

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः धार्त
राष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ४६ ॥

मार्गं नास्ति आनन्दगिरिकृतटीका ॥

तर्हि किं युद्धे विमुखः सन् परपरिभवं प्रतीकाररहितो वर्तेथा
स्तर्हि त्वां शस्त्रपरिग्रहरहितं प्राप्तं शस्त्रपाणयो धार्तराष्ट्रा
निहन्युरित्याशंक्याह यदीति प्राणत्राणादपि प्रकृष्टोयं धर्मः प्रा
णभृतामहिंसेति भावः ४६ ॥

स्वामिकृतटीका ॥

स्वस्य मेवाघ्रासानोऽर्जुन आह यदि शस्त्रपाणयः
एवं संततमः सन् ... अकृतप्रतीकारं अप्रतियुद्धमकुर्वाणं मामशस्त्रं तूष्णी
धार्तराष्ट्राः अकृतप्रतीकारं अप्रतियुद्ध्यमानं ... तर्हि तद्धननं मम क्षेमतरं पा
मुपविष्टं रणे संग्रामे हन्युः हंस्यन्ते तर्हि तद्धननं मम क्षेमतरं
यस्मात्तत्र निहेतोरत्यन्तं हितं भवेत् पापानिष्पत्तेः ४६ ॥

रामानुजभाष्यम् ॥ उपक्रमः ॥ ४६ ॥

अभिनवगुप्तकृतटीका ॥ ४६ नास्ति यदि मामिति

परमार्थप्रपा टी॰ ॥

अयं रणे योगेऽन्यस्मात् तूष्णीं स्थितं मां ते शस्त्रपाणयो हन्युस्तन्मे
क्षेमकरं पापजनकं न भवतीत्यर्थः ततः किं ... माह ४६

वनमाली टी॰ ॥ ४६ ॥ नास्ति

उत्तमवैजयन्ती टी॰ ॥

ननु चेद्धर्मभयेन यूयमेतान्न हनिष्यथ तर्हि ते राज्यलोभेन यु
ष्मान्हनिष्यन्त्येवेति चेत्तत्राह यदीति अप्रतीकारं स्वदेहरक्ष
णार्थं यत्नमकुर्वन्तमत एवाशस्त्रं मामेते धार्तराष्ट्रा हन्यु
स्तद्धननं मे मम क्षेमतरं हिततरं भवेत् ४६ ॥

मधुसूदनी ॥

प्राणभृतामहिंसा पापानिष्पत्तेः न
प्राणत्राणादपि प्रकृष्टोयं धर्मः प्राणभृतामहिंसात्यन्तं हितं भवेत् प्रि
स्माज्जीवनापेक्षया मम मरणमेव क्षेमतरं स्वप्राणत्राणाय व्यापार
यतरमिति पाठे स एवार्थः अप्रतीकारं स्वप्राणत्राणाय व्यापाररहितं
मकुर्वाणं बंधुवधाध्यवसायमात्रेणापि प्रायश्चित्तान्तररहितं
वधो भविष्यत्येव त्वया

ननु तव वैराग्येऽपि भीमसेनादीनां युद्धोत्साहात् बंधुवधो
पुनः किं विधेयमित्यत आह

क

वा तथाच प्राणांतप्रायश्चित्तेनैव शुद्धिर्भविष्यतीत्यर्थः ४६ ॥

सदानंदी ॥

यदीदृशी मतिस्तेशुभकृत्तस्तर्हि रणान्नितो त्वं युद्धाभिनिवेशेनेहागतोसीति चेच्छृणु ३ अविचार्यमनोद्भवं कृतं मोहं ममेत्यहो नन्वेवं तव वैराग्यभीमायास्तु रणेन्तकाः २ संति तैरेव बंधूनाव यः स्याद्यदि पापदः किं विधेयं त्वया तर्हीत्याशंक्याह यदीति च अहिंसा प्राणिनां धर्मः प्रकृष्टः प्राणरक्षणात् जीवनापेक्षया त्वं तेहितं मे मरणं मतं ४ स्वप्राणरक्षणे हेतुव्यापारं मां मनागपि अकुर्वाणं रणे हन्युस्तदाहं स्याम कल्मषः ५ ॥ ४६ ॥

नीलकंठी टीका दृष्टं ॥ ४६ ॥

आनंदी टीका ।

एवंपरस्परंयथाभिलाषंवर्तन्तो नाहमत्रप्रवर्तेइतिनिश्चयेना
ह अप्रतीकारमकृतप्रतिविधानमोतदासीन्येनास्थितम् ४६

रामकंठी टी०

स्पष्टम् ४६

लासिकी वल्लभली टीका

नन्वेतत्सर्वंत्वनुचयोयमितोयुद्धंत्वयिस्थितेव किंत्वहत्वा
विवेकिनस्तवत्वांकिमतनमाह यदीति ४६ ॥ स्वाभिमतमाह
यदिमामप्रतीकारंप्रतियुद्धमकुर्वाणं अतएवाशस्त्रंशस्त्रपा
णयोधार्तराष्ट्राःसंग्रामेहन्युर्हनिष्यन्ति तर्हितद्धननंमम
क्षेमतरमत्यन्तहितंभवेत् पापस्यानिष्पत्तेःसंजयउवाच ४६

रणवीरसमिद्धोधिनी ॥

ननुतंचेन्नयुद्ध्येस्तर्हिपापवृद्धय एतेत्वामेवागत्यहन्युरित्यतः
किंकष्टतरमित्याशंक्याह यदिमामिति परवधात्स्वमरणमेवा
हिंसापर्यवसायितया स्वबंधुमृतिजनितदुःखानुभवाच्च ॥
श्रेयइतिभावः ॥

176

अस्त्वितः परं किं विधेयमित्यत आह

रामचन्द्रसरस्वतीकृतटीका ॥

यदीति अप्रतीकारं प्रायश्चित्तांतररहितं देहांतममेदं प्रायश्चि
त्तमेवेतिभावः ॥ ४९

177

भाषा अनुवाद

और जो कहो कि युद्धसे विमुख बेहथियार तुमको संग्राम
मे धृतराष्ट्र केपुत्र सिकार सा पीट लेंगे तो वहमारना उन
का और मेरा मरना मेरे वास्ते कल्यान करहोगा कि जिस
मैं पापका संचारभी नही है ॥ ४६ ॥

दोहा

दोंअपाप्त अप्रतिकारी है यदिपाप्त यदिहस्त कौरवमो॰
कौंरनसहनेतो मोहिबहुत प्रसक्त ४८॥

178

संजय उवाच एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपा
विशत् विसृज्य सशरं चापं शोकसंविग्नमानसः
४७ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुनसंवादे सैन्यदर्शनो नाम
प्रथमोऽध्यायः १ ॥ भाष्यं नास्ति

आनंदगिरिकृतटीका ॥ राजानं प्रति प्रवेदि
तवांस्तमेव प्रवेदनप्रकारं दर्शयति एवमिति प्रदर्शितेन प्र
यथोक्तमर्जुनस्य वृत्तान्तं संजयो धृतराष्ट्रं राजानं प्रति परिश्रुत
कारेण भगवन्तं प्रति विज्ञापनं कृत्वा शोकमोहाभ्यां परित्यक्तान
मानसः सन्नर्जुनः संख्ये युद्धमध्ये पूर्वेण सहितं गांडीवं त्यक्त्वा पवि
योऽस्मीति ब्रुवन्मध्ये रथस्य सन्न्यासमेव श्रेयस्करं मत्वोपवि
ष्टवानित्यर्थः ४७ ॥ इति श्रीआनंदगिरिटीकायां प्रथमोऽध्यायः १

स्वामिकृतटीका ॥ एवमिति अर्जुन एवमु
ततः किं वृत्तमित्यपेक्षायामाह संजयः एवमिति विसृज्य पावि
क्त्वा संख्ये संग्रामे रथस्योपरि पश्चाद्भागे सशरं चापं विसृज्य चिंतयस्स
शात् उपविष्टः शोकेन संविग्नं सन्तप्तं प्रकोपितं मानसं चित्तं यस्य
सः एवंविधः सन् उपविष्ट इत्यर्थः ४७ ॥ इति श्रीसुबोधिन्यां टी
कायां प्रथमोऽध्यायः ॥ १ ॥ तात्पर्यं ॥

रामानुजभाष्यम् ॥ बंधुविश्लेषजनितशोकसंवि
सर्वगात्रः सर्वथा न योत्स्यामीत्युक्त्वा रथोपस्थ उपाविशत् ४७ ॥ इति रामा
ग्नमानसः सशरं चापमुत्सृज्य ॥ १ ॥
नुजभाष्ये प्रथमोऽध्यायः ॥ १ ॥

मधुसूदनकृतटीका ॥ ४७ … संग्रहश्लोकः विद्याविद्योभय
तत्संग्रह… युक्ताद्यमपि…
स्वविवेकोभवेन्मुनिः ॥ १
इत्यभिनवगुप्ते प्रथमोऽध्यायः ॥
रथो…

परमार्थप्रपाटी ॥ उपविवेश शो
इत्यभिनवगुप्ते प्रथमोऽध्यायः ॥ १ ॥
पाविशत् उपविष्टः रथोपस्थे पाविशत् अध्यायतात्पर्यं संग्रामो
एवमुक्त्वेति संख्ये संग्रामे रथोपस्थे तिष्ठतः प्रथाध्याये संक्षेपार्थो लिय
केन संविग्नं कंपितं मानसं यस्य ते वलयः पापभीरुर्वितृष्ण स्नादृढ आर्योऽलिय
त्वाधिकारी संभवति तत्त्वः मंत्रवैयादवे शोऽपत्युपद
स्मान्निजजलदलनाद्राजभोगान्निवृत्तः

मकरोद्ब्रह्मविद्योपदेशं भूभृद्धर्मात्तद्रूपं तदिदमभिहितं त्वादिमा-
ध्यायकृत्यं ॥ ४७ ॥ इति परमार्थप्रपाटीकायां प्रथमोऽध्यायः १

वनमाली टी. ॥

ततः किमित्यत आह एवमिति संख्ये युद्धे रथोपस्थे रथोपरि ४७
इति वनमाली टीकायां प्रथमोऽध्यायः १ ॥

आरुमवैजयन्ती टी. ॥

ततोऽर्जुनः किं कृतवान् इति धृतराष्ट्रस्याभिप्रायं ज्ञात्वा संजय
आह एवमिति संख्ये संग्रामे सर्वथा युद्धं न करिष्यामीत्येवमुक्त्
प्रकारेण भगवन्तमुक्त्वाऽतिधार्मिकातिकोमलमना महोदार
बुद्धिरतिशयकारुणिकोऽर्जुनः भाविबन्धुविश्लेषजनितशोके
न संविग्नं व्याकुलीभूतं मानसं यस्य सः सशरं शरेण सहितं धनुः
त्यक्त्वा परित्यज्य रथोपस्थे रथस्योपरि उपाविशत् पूर्वं युद्धा
र्थं सैन्यावलोकनार्थं चोत्थितः पश्चात्तन्निरीक्षणजनितशो-
काकुलेन्द्रियः सन्नुपविवेशेत्यर्थः ४७ दृष्ट्वा संख्ये बन्धुवर्गान्नष्टे
च्छो काकुलस्तथीः कृष्णोऽसौ कृष्णाभिन्नोऽपि प्रथमे हीति वर्णित
म् १ इति कुसुमवैजयन्ती टीकायां प्रथमोऽध्यायः १ ॥

मधुसूदनी टी. ॥

संख्ये संग्रामे रथोपस्थे रथस्योपरि उपाविशत् पूर्वं युद्धार्थमवलो
कनार्थं चोत्थितः सन् शोकेन संविग्नं पीडितं मानसं यस्य सः ४७
इति मधुसूदनी टीकायां प्रथमोऽध्यायः १ ॥

सदानंदी टी. ॥

ततः किं वृत्तमित्यत्राकांक्षायामाह संजयः संग्रामे पूर्वमेवासौ
युद्धार्थं दर्शनाय च १ भीष्मादीनां रथस्योर्द्धभागे पार्थः समुत्थि
तः शोकेनाविष्टभावत्वात्पीडितं यस्य मानसं २ सबाणं धनुरु
त्सृज्य रथोपस्थ उपाविशत् ३ ॥ ४७ ॥ इति श्रीसदानंदी टीका
यां प्रथमोऽध्यायः १ ॥

नीलकंठी टी. ॥

संख्ये संग्रामे ॥ ४७ ॥ इति नीलकंठी टीकायां प्रथमोऽध्यायः १

ततः किं वृत्तमित्य पेक्षायाम्

सुख्याभिर्लीलागारगरदानादिभिरतिघोरैरनेकविधमारणैरवमानितो
पि केशिकंसाद्यसुरार्दनकृष्णोन्नमसहायोपि संग्रामे शंकरतोषितवी
र्योपि अग्निदत्तगाण्डीवधनुर्धरोपि महाक्रूरप्रकृतीनाततायिनोहंतु
मुद्यतो धर्ममतीनवलोक्य विहृद्बन्धुस्नेहातिरेकात्तिकरुणया चाति
धर्मभयेन च प्रकम्पमानस्त्यक्तरोमा चितसर्वाङ्गः

ज्ञानेश्वरी टीका ॰एवमिति

अर्जुनवाक्यमुपसंहृत्य संजय उवाच ॥ ४७ इतिश्रीभगवद्गीता

ज्ञानेश्वरीटीकायां प्रथमोध्यायः १ ॥

रामकंठी टी॰

[illegible] मर्थमेवेति तात्पर्यार्थः

[illegible] प्रतिपद्यते एवमर्थ

[illegible] रामकंठेनावि

[illegible] इतिश्रीभगवद्गीतारामकं

पादप्रतिपादनार्थः समाप्तः ४७

ठीटीकायां प्रथमोध्यायः १ ॥

[illegible] टी॰

[illegible]

[illegible] प्रथमोध्यायः १

[illegible] मानसः सशरं चापं त्यक्त्वा संख्ये

[illegible] ४७ ॥ इतिश्री भगव

अर्जुन एवमुक्त्वा शोकेन संतप्तमानसः [illegible] रथोपस्थ उपाविष्टः ४७ ॥ [illegible] अर्जुनविषादो नाम प्र

[illegible] राजानक लक्ष्मीराम विरचितायां

द्गीताटीकायां तत्त्वप्रकाशिकाख्यायां

प्रथमोध्यायः ॥ १ ॥

[illegible]वीरसमिद्धोधिनी ॥

एवमर्जुनवृत्तांतं संजयो धृतराष्ट्रं प्रति निवेदितवानित्याह ॥

संजय इति एवमिति उक्तप्रकारेण भगवंतं विज्ञाप्य संख्येयु

द्धमध्ये बाणसहितं गांडीवं त्यक्त्वा शोकमोहाविष्टचेता रथस्यो

पस्थे पश्चाद्भागे उपविवेशेति भद्रम् ॥ ४७ ॥ इतिश्रीधरा

वीरसमिद्धोधिन्यां गीताव्याख्यायां प्रथमोध्यायः १ ॥

180

रामचंद्रसरस्वतीकृतटीका॥

संजयवचनेस्पष्टस्॥ ४१ ॥ इतिश्रीरामचंद्रसरस्वतीकृतटीका

यांअष्टमोध्यायः ८ ॥

भाषा अनुवाद ॥

अर्जुनका वृत्तान्त संजय धृतराष्ट्रसे कहते भये कि हे राजा
न धृतराष्ट्र फेरतो अर्जुन श्रीभगवानसे ऐसे बातें कहि कर
के और शोक संतापसे व्याकुल और पीडित मन महा उदास
जयकी आशासे निराश हो हाथसे धन्वा बानको भी त्याग क
र रथके ऊपर बैठगये ४७ ॥ इतिश्रीभगवद्गीतायां मनभाव
नीनामटीकायां प्रथमोध्यायः समाप्तः १ ॥

दोहा ॥ संजयवाक्य ॥

ऐसें कहि अर्जुन रनरथमेहिं पीछेहोय बाणधनुचाप
हि तज्यो शोक विह्वमन सोय ४७ ॥ इतिश्रीमहाराजर
णावीरसिंहजीकी आज्ञानुसार जो करी है वीरसिंहने
वीररसप्रकाशनी बालबोधनी श्रीभगवतगीताकीटी
का तिसकी प्रथमाध्याय संपूर्ण ॥